संस्कृत अकादमी ग्रन्थमाला - 103
In Public domain. Digitization Muthulakshmi Research Academy

षट्छिक्यकेशवार्यसुपुत्रश्रीजगन्नाथार्यविरचितः

जगन्नाथचम्पूः

प्रधानसम्पादकः

आचार्य के. नीलकण्ठम्

निदेशकः

सम्पादकः

डा. सन्तोषकुमारः जोशी

शोधसहायकः

संस्कृत अकादमी

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद्

2020

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला –103

षट्छिक्यकेशवार्यसुपुत्रश्रीजगन्नाथार्यविरचितः

जगन्नाथचम्पूः

प्रधानसम्पादकः

आचार्य के.नीलकण्ठम्

निदेशकः

सम्पादकः

डा.सन्तोषकुमारःजोशी

शोधसहायकः

संस्कृतअकाडमी

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्र्वविद्यालयः,हैदराबाद्

2020

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला -103

षट्छिक्यकेशवार्यसुपुत्रश्रीजगन्नाथार्यविरचितः

जगन्नाथचम्पूः

ISBN - 978-93-80171-38-8

प्रथममुद्रणम् -2020

मुद्रितप्रतयः – 500

पृष्ठसंख्या - 100

मूल्यम् - 90

© सर्वाधिकाराः संस्कृतपरिषादायात्ताः

प्राप्तिस्थानम्

निदेशकः

संस्कृतअकाडमी

राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था

उस्मानियाविश्वविद्यालयः, हैदराबाद् . 500007

दूरवाणी-040-27070281

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 103

JAGANNATHA CHAMPU OF SHATCHIKYA KESHAVARYASUPUTRA SRI JAGANNATHARYA

Chief Editor
Prof K. Neelakantham
Director

Editor
Dr.Joshi Santosh kumar
Research Assistant

SANSKRIT ACADEMY

(Adarsha Shodha samstha)
Recognised by Rashtriya Sanskrit Sansthan, New Delhi
Osmania University, Hyderabad-07

2020

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series -103

Jagannathachumpu of
Shatchikya Keshavaryasuputra
Sri Jagannatharya

ISBN – 978-93-80171-38-8

First Edition: 2020

Copies: 500

Price: Rs.90/-

Pages: 100

©Sanskrit Academy

Copies can be had from-
Director
SANSKRIT ACADEMY
(Adarsha Shodha Samstha)
Osmania University,
Hyderabad - 500007
Phone & Fax: 040-27070281
Email: sanskritacademyhyd@gmail.com
Website: www.osmania.ac.in/sanskritacademy

Printed at:
Bhandari Arts 'N' Printers, Hyderabad.

In Public domain. Digitization Muthulakshmi Research Academy

PREFACE

A special type of composition with mixed prose and poetry called as ChampuKavya in Sanskrit came in vogue in the beginning of Christian era. There are in many passages in the Puranas where the prose passages come midst verses. But there is not any instance is found in classical Sanskrit literature in the earlier times. गद्यपद्योभयमयं चम्पूरित्यभिधीयते is the definition given by rhetoricians in Sanskrit poetics. The earliest works of this type of ChampuKavya are not known but after the 10^{th} century A. D. it became very popular and most of them are being composed in the South India.

The earliest ChampuKavya as per the History of classical Sanskrit literature, is Nala- champu of Trivikramabhatta who is said to have been lived during the time of Rashtrakuta king Indra of 914-916 A. D. following this many Champukavyas have been composed by various authors and among which Bhojaraja's Ramayanachampu, Abhinava Kalidasa's Bhagavata-champu, Anantabhatta's Bharatachampu, Venkata-dhvari's Vishvagunadarsha champu are some of the most famous Champukavyas.

According to history of classical Sanskrit literature there are 258 Chapukavyas have been composed by various poets and there are hundreds of unpublished Champukavyas seen in the manuscript libraries.

Now the Sanskrit Academy, Osmania University pleases to bring out a rare Champu kavya "Jagannatha-champuprabadha". This prabandha was written by Jagannathakavi whose time and place are not known but

In Public domain. Digitization Muthulakshmi Research Academy

as per the introductory shlokas of this Kavya, this he was the court poet of a King called Veerabhadra of Ikshuvamsha in Andhra Pradesh. This book was published in 1878 in Telugu script from Srinidhi Press by KanchiSrinivasraya.

This book was collected by **Dr. Joshi Santosh Kumar** research assistant of our Sanskrit Academy. Dr. Santosh Kumar is very sincere at his research, has made a thorough study of it and made it ready for publication from the Sanskrit Academy. I whole heartedly appreciate his work.

I convey my sincere thanks to Prof. P.N. Shastry Vice-chancellor and Prof. Subrahmanya Sharma Registrar of Rashtriya Sanskrit Sansthan, New Delhi who are kind enough of encouraging Sanskrit Academy in publishing such rare books. I also thank Sri Aravindkumar, IAS i/c V.C. and Prof. Gopal Reddy Registrar of Osmania University, Hyderabad. I do appreciate our amicable deputy directors Dr. V. Subrahmanyam and Dr. K. Varalakshmi who are the great energy of Academy in editing and publishing the rare books.

The Academy has great regards for Dr Phanikumr who encourages it for research and publications continuosly.

Prof K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

वाङ्मुखम्

भारतीतीर्थहंसक डा. वि . ए कुमारस्वामी
निवृत्तप्रांशुपालः के.वि. सी.आर् पी हैद्राबाद्

अनितरसाधारणं चम्पूकाव्यं सहृदयानां कवीनां भक्तजनानां गीर्वाणवाणीप्रणयिनामाह्लादकारकमेतद् जेगीयते। नातिलघु न वा बृहत्कायमिदमामोदकरं क्लेशं विना पाठकानाम्। बहूनां रुचिराणां वृत्तानामायोजनेन गाने इव पठनेऽपि चेतोमोदकरं सम्भवति चम्पूकाव्यमिदम्। धाराळत्तरधोरण्या पद्यं वा गद्यं वा अस्मिन् धावति पाठकश्च तदनुधावन- प्रवणो भवेदवश्यमिति निस्संशयं वक्तुं प्रभवामः।

अत्र यमकवृत्त्यनुप्रासमुक्तपदग्रस्तानां बहुत्र प्रयोगः रुचिं जनयति वाचनं चाक्लेशकरं जायते । प्रसादगुणस्य परिपुष्टिरपि श्लाघापात्रमत्र सचेतसां चेतः प्रसादाय कल्पते। चम्पूकाव्यप्रणेता जगन्नाथः चम्पूकाव्यस्यास्य नेतापि जगन्नाथः। ईदृशो विशेषः सर्वत्र सुलभः न भवति । काव्यकर्तुः जगत्काव्यकर्तुश्च नामैक्यं भक्तस्य भगवतश्च भावैक्यं व्यञ्जयत् जयति ।

“पश्य देवस्य यत्काव्यं न ममार न जीर्यति” सूक्तिमनुसृत्य जगदिदं जगन्नाथस्योपकाव्यायते। कलानिपुणश्च जगत्कर्ता विचित्र-लीलाविलासस्य जगन्नामरूपकस्य स्वयमेव नाथः भवति । तथैवास्य सुन्दरोद्यानसंकाशस्य चम्पूकाव्यस्य जगन्नाथ एव कविः जगन्नाथ एव नायकः इति नितान्तं समुचितं चकास्ति । प्रबन्धेषु अष्टादशवर्णनानि

In Public domain. Digitization Muthulakshmi Research Academy

भवेयुरितिमत्या यथा सन्दर्भं कविरयं तादृशवर्णनेषु स्वरचनाचातुर्यं स्फुटमावेदयति । पाञ्चालीं रीतिमाश्रित्य सुकुमारमञ्जुपदमञ्जरीभिः रसज्ञानां तोषमावहति कविरयमिति विदुषां मनीषा भवेदेव । कलापक्षः रचनामाश्रित्य तिष्ठति, भावपक्षः अर्थपुष्टिमाश्रयति द्वयोः आलम्बनाय प्रभवति समीहितं काव्यवस्तु । अत्र तावत् वस्तु नवीनं भक्तिभावप्रधानमवतारयति जगन्नाथकविः। देवद्विजगुरुप्राज्ञपूजनपरायणः अयं कविवरः नवीन प्रतिभामाविष्करोति तथा हि प्रथमस्तबके कथारम्भात् प्राक् पञ्चमश्लोके मूर्ध्नः उत्तमाङ्गत्वं समर्थयति । "दरास्तस्य रदा बभुः" इति च चमत्कारकारि वर्णनं चकास्ति। 44 तमे श्लोके किंशुकपुष्पसंघा अज्ञातचक्रभ्रममादिशन्ति इत्यत्र स्वभावोक्ति चारुतामावहति ।

जगत्पतेः सुकुमारीभिर्ललनाभिः साकमुद्यानविहारं सलिलविहारं च श्रुङ्गाररसपोषणसम्भारेण सह जगन्नाथकविः चेतोहरं वर्णयति । तत्र पुनः अखण्डितविरोधानां खण्डितानां तु साधने "सहकारास्सरोजेषु सहकारा-श्चकाशिरे" इति श्लोके सहकारशब्दस्य व्युत्पत्तिः कमनीया लक्ष्यते ।

द्वितीयस्तबके तावदाहसमुन्मुखं वासवं कर्तुं "दम्भोळि धर्तुर्युधि जम्भवैरिन् कुम्भीशमारुह्य निजं विहर्तुः कुम्भीनसारातिरपि प्रसह्य स्तम्भीकृताङ्गो भविता तवाग्रे" इति श्लोकः युद्धवीररसस्फोरकः प्रस्फुरति । प्रासयोजनेन चायं कविः तेलुगुपद्यसंस्कारवान् भवितुमर्हतीति चोत्प्रेक्षामहे । प्रायशः कविः शृङ्गाररसमधिकमाश्रयति रचनायाम् । उदाहरणार्थं नवपञ्चाशत्तमश्लोकः लोभाद्भटानामित्युपक्रान्तः द्रष्टव्यः प्रेक्षावद्भिः।

तृतीयस्तबके विलसितालङ्कारशोभावतीं रचनामास्वादयन्तु सहृदयाः। तथाहि "श्वसनशिशुसमाधूत लताभिस्सौरवारवधूनामिव लास्य-

In Public domain. Digitization Muthulakshmi Research Academy

मुपदेशयन्ती भवानन्ददायिनीमादितेयभागधेयवाहिनीमभ्रापगा मद्राक्षीत् सुभद्राजनिः" अपि च पञ्चदश षोडशश्लोकौ तिमिरवर्णनपरायणौ द्रष्टव्यौ स्तः पङ्केरुहशब्दवत् पङ्केजपदं, लब्धपदस्य स्थाने लभितपदम्,उत्पाट्य इत्यस्य पदे, उत्पाटयित्वा इति च प्रयुञ्जानःकविवरः अयं निरङ्कुशाः कवयः इति सूक्तिमन्वर्थां करोति । आत्मनेपदि परस्मैपदिभेदमभावयन् बहुस्थलेषु प्रयोगानदर्शयत् । अतः अद्यत्वे संस्कृतव्यावहारिकरूपव्याहारपरैः लोकैः अभिनन्दनीयः भवति जगन्नाथकविः।

तृतीयतुरीयस्तबकयोः सुरासुररणवर्णनधूर्वहः कविः पाठकानां चेतस्सु कुतुकोत्पादननिर्वाहिपारीणस्समभवत्। "चकार कोपोज्वलदृग्वितानैः गङ्गाधरस्य प्रियमङ्गरागम्" इत्यादिषु स्वरचनामलङ्कारवतीं वितेने जगन्नाथ-कविः। रणावसाने च पुनः वसन्तर्तुवर्णनमादाय सहृदयानामाह्लादं जनयन् भूयः शृङ्गाररसपोषणे निमग्नोऽभवत् ।

अन्ते सुभद्रासनाथः जगन्नाथः सुन्दराटव्यां बलभद्रं पश्यति । तेन साकं पूरीक्षेत्रे दारुप्रतिमासु विलीनस्समभवदिति वर्णयति । श्रीवैष्णवः अयं कविः तृतीयस्तबके षष्ठश्लोके शिवः विष्णुपादस्पर्शमाकार्षीदिति कथयति । पुनः चतुर्थस्तबकान्ते "श्रीनाथमेवात्मनाथं" स्मरन् सानुगो निवेशनमाविवेश हेतिराजं (सुदर्शनचक्रं) स्वरक्षार्थमनुगच्छन्तं पूजयामास चेति वर्णयति । साधुकृतम् । तथापि प्रथमस्तबके त्रयोदशश्लोके "शरण्यस्सर्वभूतानां चक्रशूलविभूषणः। विराजते विराड्धाम श्रीधरश्शङ्करः प्रभुः" इत्यत्र हरिहराद्वैतं कथमुक्तावानिति महदाश्चर्यम् ।

भवतु अन्ततो गत्वा पुरीजगन्नाथपूजासेवाविवाहनित्योत्सववर्णनं भक्तिसम्भरितचेतसा गद्यपद्यदण्डकादिभिः माकिम् पञ्चाशतसंख्यैः

In Public domain. Digitization Muthulakshmi Research Academy

जगन्नाथकविना मृदुव्रततिततिसम्मितसमासैरकारि । अवसाने भक्तिभावं जनयन्ती कवेः रचना पुरी जगन्नाथस्य तद्भक्तानां समेषामस्माकं च विशिष्य पुण्यविशेषं पुरीक्षेत्रस्मरणेन कलयतीति निश्चप्रचं वचः जेगीयतां भूतले ।

*****

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

इह खलु जगति मनुष्यस्य धर्मार्थकाममोक्षपुरुषार्थचतुष्टय-फलसाधकं, एवं परमानन्दप्राप्तिकारकं भवति काव्यम्। काव्यमिदं दृश्यश्रव्यादिभेदेन एवं गद्यपद्यचम्पवादिभेदैश्च अनन्तशाखोपशाखैश्च विराजते । तत्र चम्पू इत्यभिधायकं काव्यभेदेष्वन्यतमं गद्यपद्योभयमिश्रितं सत् नितरां अतिशेते। गद्यपद्योभयमयं चम्पूरित्यभिधीयते इति लक्षणेन गद्यपद्योभय मिश्रितं काव्यमिदं बहुभिः बहुधा प्रशंसितम् ।

गद्यावली पद्यपरम्परा च प्रत्येकमप्यावहति प्रमोदम् ।
हर्षप्रकर्षं तनुते मिलित्वा द्राक् बाल्यतारुण्यवतीव कन्या।।

जीवन्धरचम्पूः1-9

गद्यानुबन्धरसमिश्रितपद्यसूक्ति
र्हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया।। चम्पूरामायणम् 1-3

पद्यं यद्यपि विद्यते बहुसतां हृद्यं विगद्यं न तत्
गद्यं च प्रतिपाद्यते न विजहत्पद्यं बुधास्वाद्यताम् ।
आदत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं
सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः।।

विश्वगुणादर्शचम्पूः 1-4

In Public domain. Digitization Muthulakshmi Research Academy

पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं
गद्यं पद्यविवर्जितं च भजते नास्वाद्यतां मानसे।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम् ।।

कुमारसम्भवचम्पूः1-6

संस्कृतसाहित्ये चम्पूकाव्यसाहित्यं विस्तृतं वर्तते। तत्र च वाङ्मये अस्माकं 257 चम्पूकाव्यानि दृश्यन्ते। एतानि काव्यानि विभिन्न कथाधारितानि भवन्तीति संस्कृतसाहित्यैतिहासिक लेखकानाम् अभिप्रायः। तद्विभागः एवमस्ति ।

1. रामायणकथाधारितानि चम्पूकाव्यानि -	32
2. महाभारतकथाधारितानि चम्पूकाव्यानि -	27
3. पुराणकथाधारितानि चम्पूकाव्यानि-	75
4. जैनकथाधारितानि चम्पूकाव्यानि-	08
5. महापुरुषजीवनवृत्ताधारितानि चम्पूकाव्यानि	46
6.यात्राप्रबन्धात्मकचम्पूकाव्यानि	20
7. देवतानां एवं क्षेत्रसम्बद्धानि चम्पूकाव्यानि	23
8. दार्शनिकचम्पूकाव्यानि	21
9. काल्पनिकचम्पूकाव्यानि	05
	257

(क्षेत्रेऽस्मिन् परिशोधकानां उपयोगाय चम्पूकाव्यानां नामानुक्रमणिका ग्रन्थस्यास्यान्ते निर्दिष्टः अस्ति।)

In Public domain. Digitization Muthulakshmi Research Academy

इयं च संख्या संस्कृतसाहित्येतिहासग्रन्थाधारैः वक्तुं पार्यते। परं ऐतिहासिकानां दृष्टिपथं नागतानां काव्यानां कवीनाञ्च संख्या नैव गणयितुं शक्यते। नेतिहासोपनिबद्धाः चरितार्थाः कति वा सन्ति भारते एवं विश्वे एषु चरितार्थेष्वन्यतमः जगन्नाथकविः। अनेन कविना जगन्नथ स्वामिनः माहात्म्यं, क्षेत्रे क्रियमाणाः उत्सवाः इत्यादि विशेषांशानुद्दिश्य जगन्नाथचम्पूकाव्यं रचितम्। काव्येऽस्मिन् चत्वारःस्तबकाः सन्ति। परम् अस्य जगन्नाथकवेः जीवनविशेषाः कुत्रापि साहित्यैतिहासिकग्रन्थेषु नोपलभ्यन्ते। चम्पूकाव्यस्य स्तबकान्तपुष्पिकाधारेण कविरयं याज्ञवल्क्य शाखीयः, काश्यपगोत्रसञ्जातः, षट्छिक्योपनामकः इति केशवसूरिपुत्रः इति च ज्ञायते ।

"इति श्री याज्ञवल्क्यशाखाफलायित काश्यपगोत्र श्रीमत्केशव सूरिपुत्र जगन्नाथार्य कृत चम्पूप्रबन्धे प्रथमोऽयं स्तबकः" इति। एवमेव ग्रन्थे अस्मिन् केचनश्लोकाः कविनानेन ग्रथिताः सन्ति। तेषामाधारेण आन्ध्रदेशे इक्षुवंशीयाः संस्थानाधीश्वराः आसन्। तेषु वीरभद्रः अन्यतमः तस्य पुत्रः महालिंगः। एतस्य आस्थाने जगन्नाथकविरासीदिति महालिङ्गशास्त्रिणा प्रदत्त द्रव्यसहायेणैव काव्यमिदं प्रकाशितम् इत्यादिविषयाः ज्ञायन्ते।

ते च श्लोकाः

श्रीमत्सुपर्वविभवः पूरयतीष्टानि यो रसज्ञानां।
स जगति विजयति भूयः सन्मौक्तिसूर्महेक्षुसन्तानः।।

यदेक्षुवंशस्सहि वीरभद्र राजाधिभिर्व्यक्तफलो बभूव।

In Public domain. Digitization Muthulakshmi Research Academy

तदा प्रभृत्यध्वरभुग्गणानां कुत्रास्थिता वा कुतले बुभुक्षा।।

तद्राजदानोदकवर्धितो वासं प्रत्यमोघं समहेक्षुवंशः।
असूत यत्तत्फलमप्यपूर्वं चिराय रेजे शिवलिङ्गनामा ।।

ब्रह्मत्मनो वाहनमस्य कीर्त्या विभोश्चकाराद्या विशुद्धबुद्धेः।
तत्पाणिसंक्षालनवारिधारामभ्रापगामापुरतद्विदोन्ये।।

कविः कश्चिदास्ते तमाश्रित्य विद्वान्
जगन्नाथनामा च षट्छिक्यवंश्यः।
यदिय्यत्वसंकल्पवंतं पुमांसं
जहात्येव दूरं जलध्यग्रकन्या ।

तेनेयं रचिता चम्पूर्माननीया मनीषिभिः।
तेन राज्ञा दत्तमूल्या मुद्रिता जयतां सदा ।। इति

श्रीमद्यियुण्णि श्रीनिवासार्येण संशोधितोऽयं ग्रन्थः जगन्नाथप्रबन्धः इति नाम्ना चेन्नपुरि लाल्पेट वेङ्कटरामानुजनायकस्य श्रीनिधिमुद्राक्षर शालायां कञ्चिश्रीनिवासनायकेन 1878 तमे तेलुगुलिप्यां प्रथमवारं प्रकाशितः। अधुना ग्रन्थोऽयं नोऽपलभ्यते। अतः संस्कृतप्रेमिणां एवं तेलुगुलिप्यनभिज्ञानां सर्वेषां संस्कृतकौटुम्बिकानां सौकर्याय देवनागर्यां संस्कृत अकाडमी द्वारा प्रकाश्यते। ग्रन्थोऽयं साहित्यरसिकानां अमन्दानन्दं जनयतीति आशासे ।

सुहृज्जनसुधीविधेयः
डा. जोशि सन्तोषकुमारः

In Public domain. Digitization Muthulakshmi Research Academy

श्रीभूनीलावधूभिस्स्मितकलितमुखश्रीभिरन्योन्यबद्ध-
स्नेहाभिस्सेव्यमानस्सुरमकुटलसद्दीप्तिनीराजिताङ्घ्रिः।
रक्षस्वेत्यागतानामभयवितरणादूर्जिताक्लिष्टकीर्तिः
ग्रन्थस्यास्यान्तरायप्रशमनमभितस्संविधत्तां मुरारिः।। ||1||

श्रीमद्वानाद्रिवंशे कलशजलनिधौ मौक्तिकाभोऽवतीर्णः
श्रीकान्ताङ्घ्र्यब्जभक्तिस्फुरितहृदयनिर्धूतनित्यारिकृत्यः।
वेदान्तार्थप्रपञ्चीकरणनिपुणतत्वार्थविद्यानवद्यो
पाधिप्रावण्यधुर्यो विजयति हृदि मे वेङ्कटाचार्यवर्यः।। ||2||

वर्षासूद्वेलकूलङ्कषगगनधुनीध्वानतुल्यस्वराध्या
यद्वाग्झारीप्रसङ्गे विमतचटुलतोच्चाटने निस्ससार।
तेषां गीर्वाणवाणीवितरणचतुरश्रीजुषां चेतसो मे
देयात्पद्माकरत्वं चरणसरसिजं वेङ्कटाचार्यनाम्नाम् ।। ||3||

श्रीमत्काश्यपगोत्रसम्भवमणेष्षट्छिक्यगेहाभिधा-
धीनस्योत्तमकेशवार्यविदुषः पौत्रं विदुर्यं जनाः ।
रामाचार्यकृतिप्रतीतिजनुषो लक्ष्मीशतत्वं विदः
पुत्राः केशवसूरिणोऽभ्युदयिनो भूयो जयन्ते भुवि ।। ||4||

तत्रैकः श्रीनिवासापरविभवजनुर्वेङ्कटाचार्य विद्व-
द्वैलेयांघ्र्यब्जसेवासमधिगतमहाबुद्धिवैशद्यविद्यः।
सद्योगारम्भहृद्यस्सरसिजनयनध्यानपारीणलोक
प्रध्वस्ताघांघ्रिरक्षाभरणभरणिलब्धोत्तमाङ्गत्वमूर्धा।। ||5||

In Public domain. Digitization Muthulakshmi Research Academy

नत्वा श्रीनायकं तच्चरणसरसिजामोदसक्तान्श्च भक्तान्
कृत्वा सम्यक्प्रणामं स्थिरतरकविताधूर्वहेभ्यः कविभ्यः।
वक्ष्याम्येत्प्रबन्धप्रभुतिलकलसन्नामकोऽहं नवीनं
मन्यन्तां सत्प्रधाना नवचरितजगन्नाथचम्पूप्रबन्धः।। ।।6।।

सन्तः कृपैकनिलयाः कुपदत्वहेतो-
र्माकान्श्चिदुक्तिपरिभेदनलम्पटान्नः।
कार्यीनिरोद्धुमिहकाकभिदामवाप्तं
पैकाण्डमीश्वरतिमाधवसूचनाय ।। ।।7।।

In Public domain. Digitization Muthulakshmi Research Academy

कथारम्भः

एकदा कलहभुक्करवीणागानपल्लवितकाननभागः।
पर्यटन्मुनिरशेषजगन्ति प्राप पाकदमनस्य समीपम् ।। ।।1।।

आगतं तमृषिसत्तममारात्स्वागतेन विनियुज्य महेन्द्रः
मोदजाश्रुकृतपादयुगप्रक्षालनं सविनयं निजगाद ।। ।।2।।

भगवन्नखिललोकानवरतसञ्चार परिब्रूहि मह्यं धरायां किं भवति चरितमिति ।

मुनिस्सविज्ञानखनिर्बभाषे विनम्रकायं विनयेन जिष्णुम् ।
दृष्टं मया चित्रमदृष्टपूर्वमागच्छता देव! भवत्सकशम्।। ।।3।।

भूदेवैर्धीरधीरैरखिलनिगमसम्प्राप्तदीप्रप्रबोधै-
रन्योन्यं बद्धदीक्षैः स्वमतपरमतस्थापनोच्छेदनेषु ।
पूर्णग्रामाग्रहारःकलुषहरनदः पुण्यकर्मप्रचारः
स्तोतुं को नाम दक्षो भवति तमधुना योऽस्ति हीन्द्रान्ध्रदेशः।।।।4।।

श्रुङ्गारोन्मत्तभृङ्गीरवमिलितपिकध्वानगानप्रसङ्गा
सङ्गीताम्नायभङ्गी निपुणदिविजलोलेक्षणाञ्चत्कुडुङ्गा ।
गङ्गाचञ्चत्कुरङ्गासमधिगतमहाभृङ्गिवाहोत्तमाङ्गा
छङ्गोद्गच्छद्विहङ्गाविगलितकलुषा भाति तत्रोत्तराङ्गा।। ।।5।।

यच्चन्द्रशालासु सुखं निषण्णाः श्रान्तिं युवत्यो रतिजां नुदन्ति ।
मन्दाकिनीतुङ्गतरङ्गशीतमन्दारसौगन्धिकवातपोतैः।। ।।6।।

In Public domain. Digitization Muthulakshmi Research Academy

निशम्य युवतीकराम्बुजविपञ्चिका
पञ्चमस्वरप्रणयितश्रवस्सुखकरप्रक्रमान् ।
पिकाःश्श्रुतिपथं गतान् यदभिसौधमायान्ति स-
ङ्गताः प्रतिकृतस्वनप्रकटितानुरागाविलाः।। ।।7।।

यद्वेश्माङ्गणरत्नदण्डफलके स्थित्या मयूरार्भकाः
हंसैर्व्योमनदीकुशेशयगतैः कुर्वन्ति सल्लापनम् ।
अस्मत्पत्तनजन्मभिर्युवतिभिः पुंभिस्सदृक्सुन्दरा-
युष्मद्राजनिकेतने कतिपयास्तिष्ठन्ति केका इति ! ।। ।।8।।

जालाभिसारितरुणीकचधूपधूम-
स्तोमेन लिप्तमभवद्गगनं सनीलम् ।
यत्रोच्चवेश्मवितर्तेर्निबिडान्धकार
स्थित्येति चेद्ग्रहयुतेन हि तत्प्रशस्तम् ।। ।।9।।

आत्मीयाद्भुततरवैभवाप्तरम्य प्रख्यायां पुरि वदनेषु मूर्धजेषु ।
गेहेषूत्तमकुलवृत्तमानिनीनामध्यास्ते सकलकलापमञ्जुलश्रीः। ।।10।।

तादृगभ्रङ्कषस्वेतगोपुरागोपुरोपमा ।
राजधानीतुरङ्गेभ राजधानी विराजते ।। ।।11।।

समधरणिपसङ्कुलोपकार्यं हिमगिरितुल्यगजाग्र्यदृश्यसौधम् ।
धननिचयविराजमानहर्म्यं दशशतलोचन तत्पुरं विभाति ।। ।।12।।

तत्र स्वकर्मनिर्मितशर्मवच्चातुर्जातयुते हितेतरालंघ्यप्राकारशिखरे खरेतर किरणमणिकल्पितकनकमण्टपपद्मरागभित्तिस्तम्भं चुम्बितशशि-

In Public domain. Digitization Muthulakshmi Research Academy
बिम्बमणि केतुस्तम्ब स्तम्भितत्रियम्भकसखविभव विभवप्रमदाप्रमथाधिपसदन द्वितीयं भाति ।।

तत्र हि–

शरण्यस्सर्वभूतानां चक्रशूलविभूषणः ।
विराजते विराद्धधाम श्रीधरश्शङ्करः प्रभुः।। ।।13।।

तयोर्गरुत्मदृषभेन्द्रवाहयोः प्राचीनबर्हे प्रथमस्य वक्ष्ये।
चित्रं चरित्रं जगदीश्वरस्य स्वरूपलावण्यसमृद्धितां च ।। ।।14।।

यदाननेन द्वैविध्यं विधोराप्त्या प्रधावतः।
श्लेषतः प्रथमादभ्रवचनस्यार्थिताभवत् ।। ।।15।।

चक्षुरौपम्यमाप्तायाश्शुकैस्सैन्दर्यमत्सरात् ।
गौरवाप्त्यैव्यत्ययेन दरास्तस्य रदा बभुः।। ।।16।।

यस्यालकानिर्भीरितामिलंदा यस्याधरः पल्लवमव्यलीकम् ।
यत्पाणिपादं विकसत्सरोजं यःपञ्चबाणप्रतिपञ्चबाणः।। ।।17।।

भवन्ति चेत्सर्वजनाः फणीन्द्राः स्तुवन्ति कल्याणगुणांस्तदीयान् ।
शर्वन्ति चेत्तन्महिमप्रकर्षसर्वज्ञतायां प्रभवन्ति नूनम् ।। ।।18।।

तस्य नवजलधरकान्तस्य विश्वमोहना स्वयत्नकृतजगद्भद्रा सुभद्राविद्रुमाधरी स्वधर्मनिर्मुक्तलक्षणाक्षणप्रभेव सहचरी वसति तद्रूप-लावण्यादिकम् वाचामगोचरतां वाचस्पतेरपि वितरति।।

सूक्तिश्चेदमृतस्रवन्त्यधिगतावास्ताकथंसम्भवे–
द्वालोप्युज्झितितत्कटाक्षकलनादिन्दीवरे सम्भ्रमं ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्याः कान्तिनिदर्शनाकमलिनी गर्भाश्रया स्याद्युति-
स्सूते कौतुकमङ्गलानि जगतां तन्नामपूतं वदन् ।। ।।19।।

तन्मूर्तिस्फुरणं विलोक्य तटितः कुर्वन्ति निष्ठां क्षणः
न प्रत्यक्षमनल्पवह्निपतितं स्यादेव जाम्बूनदम् ।
प्रागेवन्यपतत्तदंघ्रियुगले भक्त्या हरिद्रा च सा
तत्सान्निध्यदशामवाप्य दृषतां स्यात्पुष्यरागात्मता ।। ।।20।।

अधुनापि सृजत्यनूत्नजम्बूर्जितजाम्बुनदविश्रुतेस्सुतन्व्याः।
कचसाम्यमुपैतुमेव नित्यं रुचिना पक्वफलान्यहो महन्ति ।। ।।21।।

आघ्रायामोदमब्जादधिकमलिगणाः प्राप्य वक्त्रोर्ध्वसीमा -
मन्तर्गन्तुं प्रसार्यस्फुटकनकसुमस्पर्धिनीं तत्र नासाम् ।
दृष्टोद्विग्ना ललाटे ध्रुवमसितसरोजातनेत्र्याः प्रलीना-
स्तन्नोचेत्कुन्तलानां भ्रमरकपदनिर्वाच्यतास्यात्कथन्नु ।। ।।22।।

तदीयफालस्सुमधन्वनः किन्नासाशलाकार्थनिशाकरास्त्रम्।
तत्कुन्तलास्निग्धमषीविलप्तप्रद्युम्ननामाक्षरपङ्क्तयः किम् ।। ।।23।।

पञ्चेषु देव प्रथमेषु केत्वोर्धाताविरोधं तरलायताक्ष्याः।
नेत्रोपमत्वे जनितं निहन्तुं राजीवशब्दं रचयाञ्चकार ।। ।।24।।

क्षीराब्धितो यदिभवेदमृतांशुलक्ष्म-
मेकैकशस्तदपिकोटिकलासमग्रम् ।
ज्योत्स्नावितानमपि यावदुदेति तस्मात्ता-
वत्स्मितस्य कलया तुलितं हि तस्याः।। ।।25।।

In Public domain. Digitization: Muthulakshmi Research Academy

सुधांशुबि[illegible] पदं [illegible]म् ।
यदापबिम्बं ललनाधरत्वं सुधाकरत्वं सुलभं बभूव ।। ।।26।।

अदोषलेशद्विजराजपङ्क्तिप्रह्लादकेनाब्जमुखीमुखेन ।
राजाद्विजानामपि निह्नुतोऽभूद्दोषाकरत्वाच्छशराजलक्ष्म्या ।। ।।27।।

तस्यास्सुभद्रातरुणीमतल्ल्याः स्फुटं कपोलौ मुकुरावमूल्यौ ।
यदात्मदर्शोर्जितकर्मसिद्धिमनन्यसाधारणमापतत्र ।। ।।28।।

कज्जलकान्त्यवहेलननिपुणा तस्यास्सितेतराब्जाक्ष्याः।
भृद्वय्यक्षिच्छविभास्करजातोद्धूतवीचीवद्भाति ।। ।।29।।

श्रवणे तस्याश्चाक्षुषसौषम्यौदात्यविज्ञाने ।
स्तब्धनां स्रष्टॄणां संख्यासूचन्नवांकवद्भातः।। ।।30।।

गलस्सुभद्राकमलाननायास्सुमायुधस्योत्तमशंख एव ।
माधुर्यनादेन मनोहरस्य प्रियस्य यस्माद्धृदयं बिभेद ।। ।।31।।

निरन्तरं तत्कुचचक्रवाक द्वन्द्वं मुदा भाति न चित्रमेतत् ।
यतो निरस्तारुणबिम्बसम्पद्रदांशुकस्यैव समीपमाप।। ।।32।।

सरोजचयसारतःकमलभूस्सुभद्राकरौ
विधायनवविद्रुमारुणगुणं तयोर्न्यक्षिपत् ।
युनक्ति समयोऽपि तद्गुणविवृद्धये पल्लवारुणं
प्रतिदिनं ततः किसलयस्सरागक्षयः।। ।। 33।।

मध्यं मुकुन्दपदमेवमनोहराङ्ग्या–
स्तत्संश्रयादतुलविश्रुतमेति नीवी।

In Public domain. Digitization Muthulakshmi Research Academy

मोक्षं च नव्यसुखहेतुमनन्यजन्म
कर्मापहं यदखिलेश्वरनित्यचिन्त्यम् ।। ||34||

सम्यग्विदर्शयिषुणा सहसात्मविद्या-
मुन्नीय्यमान इव यौव्वनमान्त्रिकेण ।
तद्रोमराजिरुदभासतरुच्यनाभी
वल्मीकगह्वरमुखादिव कृष्णसर्पः।। ||35||

जघनं पुलिनं वदन्ति चेत्तज्जडयोगेन विना कथं भवेत् ।
अत एव मनोजराजसिंहासनमूचुः कतिचिद्विदां वराः।। ||36||

नितम्बमिन्दिन्दिरनीलवेण्या स्फुटं सरोजातशरस्य चक्रम् ।
यतो जगन्नायकचित्तमाशु स्वविभ्रमेण भ्रमयाञ्चकार ।। ||37||

संगृह्य सारं ससृजे विधाता तदूरुकाण्डौ कदलीतरूणाम् ।
नोचेत्कथंस्याज्जगतीतलेऽस्मिन् स्वजातिनैस्सार्यमनन्यसिद्धम्।।38।।

स्मरे प्रदग्धे सति तस्य धाता शरादिना संविदधे दृगादीन् ।
तस्यास्तदातूणयुगं प्रयत्नाज्जंघा बभूव स्वयमुत्सुकेन ।। ||39||

पादौ पद्मसमानौ पल्लवसम्पद्विपत्करौ तस्याः।
भास्वद्रेखाभव्यौ मृदुला वरुणौ मृगीसमानदृशः ।। ||40||

एकदा तथा कान्तया सुभद्राकान्तया योषिद्रूपवद्धीप्रभृत्यनन्तशक्तिभिरात्मानुरूपव्यक्तिभिस्सहसहावानहार्यधारी स भगवान् श्रीजगन्नाथदेवः पवनकम्पितचम्पकसम्पदन्धीकृतपुष्पन्धयमृग्यमाणमाणवरैणश्रेणीसेविताशोकतरुं कतरत्तरुशाखोपरिचरत्केकिकेकारवाकर्णनसंक्षुप्तफणामणिव्यालं रसालसालपुन्नागपूगतमालतालतिलकामलकलिकुचविकचन्मालतीलतिका

In Public domain. Digitization Muthulakshmi Research Academy
कुञ्जपुञ्जान्तर्ज्योघृष्यमाणमोहनमहोत्सवपरवशशकुन्तावलोकनविकलीकृताखिललोकस्थैर्यं नैरन्तर्यामन्दसुमस्कन्धस्यन्दन्मरन्ददधाराभिर्मनोजराज–मभिषिञ्चतामिववरागमाणां परागपङ्किलचतुष्पदाभिराममारामं निरीक्षितुं निरगात्।।

तदनुभगवन्तमनुवसन्तस्सन्त इव सन्त।
प्रमुखाश्शान्तेतरानेकशकुन्तरुता ऋतवोन्वविशन्त ।। ।।41।।

कमनीयगुच्छकलितप्रततिस्फुरमाणभङ्गपरमादरिताः।
सविकारकीरवचना रुरुचुर्नवय्यौवना इव तदा तरवः।। ।।42।।

प्रपुल्लकुसुमाकराः प्रतिदिनं मनोजन्मनः।
प्रवास वतिकाङ्गनाप्रदलनारुणौग्रच्छदान् ।
दधन्त इव रेजिरेऽर्धशशलाञ्छनाकारिकान्
दिगन्तर निरन्तरप्रसृमरांशुकाः किंशुकाः।। ।।43।।

अभ्रङ्गताः किंशुकपुष्पसंघा स्समीरवेगेन परं भ्रमन्तः।
अधः पतन्तोजनलोचनानामलातचक्रभ्रममादिशन्ति।। ।।44।।

पतितानि पलाशानि कुसुमेषु महीपतेः।
प्रतापाग्नेरिवाभान्ति निर्धूमाङ्गारराशयः।। ।।45।।

अग्रे समग्रं सुमितान् पलाशान्निरीक्ष्य केचित्प्रहसन्ति नूनम् ।
सुमापदेशाद्बकुलास्सरोषं वितन्वते लोचनरक्तिमाणम् ।। ।।46।।

पिकरुतैस्सहकारतरुव्रजः प्रकटयन्निव बन्धुरपल्लवः।
हृदयरागमुपागतमीश्वरं सनयमाह्वयते किमनेकधा ।। ।।47।।

In Public domain. Digitization Muthulakshmi Research Academy

अखण्डितविरोधानां खण्डितानां तु साधने ।
सहकारास्सरोजेषु सहकाराश्चकाशिरे ।। ||48||

परभृतास्सहकारपरम्परां रुचिरपल्लवभोगरुचिज्ञतः।
अनुसरन्ति सरम्यकलस्वरास्वरसिनां वशिनामपि सत्पदाः।। ||49||

मण्डितप्रियतमानिव मल्लीवल्लिकाः कुसुममञ्जुलवृक्षान् ।
कुर्वते स्म परिरम्भणमुच्चैःकोमलाद्भुतवयः कमनीय्याः।। ||50||

तादृग्विधे सुरभित्तर्तुगणाभिराम
क्रीडावने विभवचैत्ररथादिमित्रे ।
कान्तो निशान्तनिचयः खलु विश्वकर्म
निर्माणमाणधनवत्वमपाकरोति ।। ||51||

निशान्ते निशान्ते सुतो यास्सरस्यः सरस्यां सरस्यां बिसानां प्रसूनम् ।
प्रसूने प्रसूने प्रभूतं मरन्दं मरन्दे मरन्दे मदोन्दत्तभृङ्गाः।। ||52||

भृङ्गाररवशृङ्गारवनान्तरङ्गस्थलीरिङ्गत्कुरङ्गरिंखाघातविधूतद्योतनश्वेत -वितानायितकेतकीरजःपटलं पान्थजनमृगयायासपरिश्रान्त पञ्चशरवीर-विश्रमास्तीर्णविस्तीर्णकुथाभिरिवानेकविधाभिरामसुमरजस्तोमशबलशाद्वली भिर्विराजमानं मानवतीमानापहारचतुरं मरुत्पतेरुद्यानमिव सद्यस्सुरता-वाप्तिजनितानुरागं परिमललोलुपालि कुलविलुलितफलललितलवलीलता विलसितचन्दनमन्दारतरुच्छायापहृतजनतानरतानवतापं तानतापञ्चायुध-कञ्चुकिसम्मतपरभृतव्रातगीतेनावगीतेन कृतभूतश्रुतिमोदं सदानवद्यसदा-नहृद्यवशापरवशादरकरकराघातविधूतसकलकलसकलकुसुमशरसद्यानमुद्या नं सद्योगि विद्याविद्योतितप्रभावो विभावरीचरवैरी निवेशमापादयामास ।

In Public domain. Digitization Muthulakshmi Research Academy

हर्तुं विहर्तुं पुष्पाणि पुष्पवच्चक्षुषा सह ।
सहसा शीतपवनो पवनं योषितो विशन् ।। ।।53।।

आयातं पितरमिवाभियातुकन्तु केकालिस्वनघनकाहलप्ररावैः।
पुष्पर्ध्युज्वलदुरुकिंशुकप्रदीपैर्नानासद्विजकुलनादवेदघोषैः।। ।।54।।

आगच्छति प्रियवनं जगतामधीशे
वृक्षाग्रशोभिलतिकाःपवनाभिवीताः।
पुष्पाणि तत्र विकिरन्ति पुरीपुरन्ध्र्य
स्सौधाग्रजालकुहरादिव सानुरागाः।। ।।55।।

मधुरिपुयोषितः करतलैः कुसुमापचयं
विदधुरनङ्गतापमपि यावदपाङ्गशरैः।
तदनुमिलिन्दपङ्क्तिगुणटांकृतिकामकरो-
त्कुसुमशरः किमात्मशरकार्यविभङ्गुरुषा।। ।।56।।

स्वकप्रतीकप्रतिरूपजन्म केलीवनं विद्रुममेवकर्तुम् ।
तासां प्रसूनादिकलाविकानां करत्विषाविद्रुमिता महीजाः।। ।।57।।

पुंखानुपुंखार्पितपुष्पबाण बाणक्षतानामपि भामिनीनाम् ।
सत्योन्नतादीश्वरसन्निधानात्सद्यो भवत्स्वाध्विकभावपूर्तिः।। ।।58।।

तासामिङ्गितजातिचेष्टितगुणान् ज्ञात्वा मुकुन्दो यथा
कालं गाढनखक्षतैः करिकरक्रीडाविधानैः कलाः।
गाढालिङ्गनचुम्बुनैस्समणितैर्दन्तक्षतैस्सत्वरं-
रुध्वान्तस्सुरतैः प्रमोदमकरोत्कन्दर्पविद्यागुरुः।। ।।59।।

In Public domain. Digitization Muthulakshmi Research Academy

अर्धोन्मीलितलोचनं समुदयद्रोमाञ्छमाविर्भव-
त्स्वेदं हुंकृतसीत्कृतप्रविततं सम्यक्तथैवं पुनः।
इत्याद्यैर्वचनैरुदञ्चितमहोत्साहं बभूवाद्भुतं
तासां तस्य समागमे खिलजगत्सम्मोहनं मोहनम् ।। ।।60।।

तत्र कुञ्जे कुञ्जे मञ्जुलमञ्जीरसञ्जातशिञ्जितरञ्जिताः प्रियाकर्षण-विलुलित कचभारैरामोदास्वादलोलाभिपतल्लोलम्बानां विनयं जनयन्त्यः पुरुषायित सुरतच्छिदताराहारमुक्ताभिस्समं समभिपतच्छ्रमजललवान् किसलयव्यजन पवनशिशुनापनयन्त्यः चतुरतरनायकसङ्गमविह्वलिताङ्ग्यः परस्परोत्सङ्गपरिधानाश्शयन्त्यः रम्भास्तम्भसम्भूतजाम्बूनदलताविताान-भ्रान्तिमापादयन्त्यः नितान्ततान्तास्सीमन्तिन्यः रिङ्गत्तुङ्गतरङ्गमङ्गलगङ्गा-वगाहमान मानसास्तस्थुः।

तदनुप्रमदाधरमधुपानसेवारक्तलोचनः हेलावतीहालाहलक्रूरकटाक्ष-निक्षेपेणेव नीलतनुः कुकुन्दरमन्दमहीध्रबन्धुरकुचमर्दनेनेवारुणकरतलः-भ्रमरकान्तारेषु दृश्यमान श्रमबिन्दुतारकितवदनदर्पणः राक्षसवैरीनारी-भिस्सहवारिक्रीडामरोचयत् ।।

प्रययौ भगवान् जगन्निवासः प्रमदाभिस्सहपद्मलोचनाभिः।
स्ववशाभिरकातरं वशाभिस्सहगङ्गामिव सामजाधिराजः।। ।।61।।

ददर्शगङ्गातटनीमभङ्गां सुराङ्गनाखेलनजोत्तरङ्गाम् ।
रथाङ्गभृद्धंसरथाङ्गभृङ्गविहङ्गरिङ्गत्कमलान्तरङ्गाम् ।। ।।62।।

दृष्ट्वा सुभद्रापतिराहजायामेतां नदीं शीतमरुत्समेताम् ।
पश्याब्जभृङ्गोत्पलसैकताम्बुनीलीभिराप्तां तव रूपसाम्यम्।। ।।63।।

In Public domain. Digitization Muthulakshmi Research Academy

भागीरथीय कलहंसयोषिद्विहारलीलाब्जसुगन्धिवाता ।
सुधोदकोद्वर्तनजातनादा तनोति पञ्चेन्द्रियतर्पणं नः।। ।।64।।

भागीरथीसलिलवेगोत्पत्तिशिखरभागावगाहक नृणां-
आगःप्रभूतघनपूगप्रवातघनवेगापगा कुलमणिः।
यागाशनामिथुनजेगीयमानवररागानुरागविचर-
द्धोगीन्द्रचर्वणसदा गाति मां सलशिखी नागिनी राजते ।। ।।65।।

कमलसुरभिगङ्गाशीतवाताभिपात
क्षपितसुरतजाता यासतोये मुरारिः।
निजयुवतिजनेभ्यो नेमिरावाभिमूर्छ-
द्दशदिशमितिशंसन् तत्र तीरं विवेश।। ।।66।।

इति श्री याज्ञवल्क्यशाखाफलायित काश्यपगोत्र
श्रीमत्केशवसूरिपुत्र श्रीजगन्नाथार्यकृतचम्पूप्रबन्धे
प्रथमोऽयं स्तबकः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयस्तबकः

अधराधन्मुरवैरिरवातरत्कटनिबद्धचलत्कनकांशुकः।
कनकसानुमतः पृथिवीधरान्नवयिवाभ्रशिशुस्तटिदावृतः।। ।।1।।

त्रिपथगोपरिशीतलमारुतक्षपितघर्मपयः कणिकास्त्रियः।
तमवतेरुरतन्द्रमनुव्रतास्सुरुचिरं रुचिरञ्जितभूषणाः।। ।।2।।

शनैर्ययौ कलत्राणां विश्रान्त्येतद्धुरन्धरः।
स्वकलत्रधुरातानि विश्रान्तानि ययुस्तदा।। ।।3।।

कञ्जाताक्ष्यस्सैकतानि व्यभिन्दन्गाच्छन्त्यस्ता गौतमीतीरजानि ।
श्रौण्यौपम्यं प्राप्य दर्पान्वितानीत्येकं मूलच्छेदनायेव यत्नात् ।।।।4।।

मनसि विलुलितानां मानिनीनां विहृत्य-
त्वरयति बहुधापि स्नातुमाक्रीडमध्ये ।
न जहुरलसतां स्वामङ्घ्रिपद्मानि तासां
भवति सहनिसृष्टो दुस्त्यजो हि स्वभावः।। ।।5।।

एवं सुभद्राजानिरभद्रशमन्यास्सुरतटिन्याः भ्रूविभ्रमैस्तद्भङ्गभङ्गीभङ्गं कुर्वन्तीभिरिव विशालविलोचनैर्विकचकमलानि विजेष्यन्तीभिरिव नाभिह्रदानामगाधतां परिहरन्तीभिरिव संघशः प्रविशन्तीभिस्सीमन्तिनीभिस्सहवसन्त इवाशान्तसौरभं निदाघ इव सदा पङ्कशमनं वर्षा इव तर्षापहजलदं शरधिवत्स्फुरद्राजमण्डलं हिमसमय इव परममहिमयुतं शिशिर इव परमाख्याभिरामं श्रीमत्तीरनीरमभिपेदे ।

वने विहृत्यसंश्रान्ता वनजायातलोचनाः।
गङ्गामागत्य तत्रापि वनक्रीडां समारभन् ।। ।।6।।

In Public domain. Digitization Muthulakshmi Research Academy

काश्चिज्जल युवतयोऽञ्जलिभिः पिबन्ति
काश्चित्क्षिपन्ति तदुपर्यतिहासपूर्वम्।
उत्प्रापयन्ति वनिता इतरास्तदेव
गृह्णन्ति मौक्तिकधिया भिपतत्वराश्च।। ||7||

नलिनेक्षणयोषितस्सलीलं जलपूर्णेन मुखेन शीकराणि।
विकिरन्ति निरन्तरानलेपं व्यपनेतुं हिमिकामिवाम्बुजानाम् ।। ||8||

वनिताः करताडनैश्चकोरान् स्मितवक्त्राभिमुखान्नयन्ति दूरम्।
अपहर्तुमिवागता इतीव स्वकनेत्रस्फुरणं चकोरनेत्र्यः।। ||9||

विगाह्य कस्यां मृदितं विलेपं प्रक्षालयत्यां सुरतेङ्गकानि ।
काचित्समालिङ्गनकैतवेन चक्रे पुनः कुङ्कुमपङ्कचर्चाम् ।। ||10||

काचित्कपोलपरिमार्जनकैतवेन
दष्टाधरा प्रियतमेन कुरङ्गनेत्री।
सद्यः प्रहर्षपुलकाङ्कुरिताङ्गयष्टिः
सव्रीडहासरुचिरं प्रियमालिलिङ्गे ।। ||11||

युवतयः कुमुदाब्जपरस्परप्रहरणोत्सवलग्नमनोरथाः।
विरुरुचुः पतिविश्रमकारणाधिकृतलक्ष्यरतिप्रतिमा इव ।। ||12||

विहृत्य भर्त्रा सह विष्णुपद्यां प्रतीरमापुस्सुदतीललामाः।
स्पष्टं जगद्द्रष्टुमिमं समन्तात्प्राप्ता इवाहि प्रभुपद्मगन्ध्यः।। ||13||

परिदधे हरिरम्बरमुत्तमं तदनु काचन मूर्धजमार्जनं।
सुजघना विदधे कचकुञ्चनं व्यजनवीजनमीशुतुरङ्गनाः।। ||14||

In Public domain. Digitization Muthulakshmi Research Academy

लिकुचकुचा चकार मदनेरितधस्सु–
ललितमीशितुस्समुदयत्पुलका तिलकम् ।
उदयति पाण्डुतां यदि विहाय निशासु शशी
तदनु भवेदनेन सम इत्यभिमानवती ॥ ॥15॥

अररमनोरमोरसि विलिख्य हरेश्चतुरा –
सुरभिविलेपनेन रुचिरं सहकारतरुम् ।
कुसुमलता नितान्तपरिरम्भणमीक्षयती
मुकुरमसूचयत्सहृदयन्नु सपत्निजने ॥ ॥16॥

सितचन्दनचर्चितौ भुजौ प्रिययाभर्मपिशङ्गवासनः।
परिघौरजिताम्बुलेपनाविव पश्च प्रदरस्य रेजतुः॥ ॥17॥

मुक्तानां स्रजमूर्जिताम्बुसरो विन्यस्ताखिलस्येशितुः
वक्षस्याननमण्डलामृतनिधिग्रीवाप्रणाल्युद्गताम् ।
लावण्यामृतवाहिनीमुभयधा नाभीह्लदव्यापिनी–
मूचुःकेचन गर्भीनिर्गतजगत्पोतान्तपङ्क्तिं परे ॥ ॥18॥

एवं जगदीशितुरसीताम्बुजनयनाः सानुनयं सुमोत्पत्तिमिव चन्दनस्य आमोदजननमिवचामीकरस्य फलोद्गममिवेक्षुकाण्डानां स्वभावमनोहरस्य चक्रधरस्य किरीटकटककङ्कणकौस्तुभकेयूरादिभिरमूल्यमाल्याभरणै - रलङ्कारमारचय्य स्वयमपि तत्क्रियानुषक्ता बभूवुः।

हेमवल्लीसमारामाः क्षौमधारणमाचरन्।
भाभिस्तासां पिशङ्गीभिर्दिशः कौशेयधारणम् ॥ ॥19॥

In Public domain. Digitization Muthulakshmi Research Academy

तदा मुरार्युन्मिषिताब्जलोचना पयोधराबद्धपटानि रेजुः।
रथाङ्गपक्षिष्विव मीनकेतुव्याधेन जालान्यभिसन्धितानि ॥ ॥20॥

रथाङ्गिपाणिप्रवराङ्गनानां सीमन्तलेखा रुरुचुर्विभक्ताः।
भल्लास्सुमेषोरिव सन्मुनीनां वशित्वनिर्मूलनलब्धलक्ष्याः॥ ॥21॥

कबरीकरणं शिरोरुहाणां ललनाश्चक्रुरिदं धृताः कबर्यः।
कबरीकरणं वितन्वते स्म भ्रमरौघस्यतमामहं युतायाः॥ ॥22॥

विमलानि मुखानि विश्वभर्तुः ललनास्तास्तिलकैः कलङ्कयन्ति।
स्वमनांस्यबलावलोकनेन स्फुटमेवं स्युरितीव सूचयन्त्यः॥ ॥23॥

प्रतिमल्लवर्णमपि कज्जलं हरि-
प्रमदेक्षणानि यदलञ्चकार तत् ।
क्षममम्बुजानि धवलानि साध्वल
ङ्कुरुते न किं मधुलिहां कदम्बकम् ॥ ॥24॥

ताभिर्धृतानि रुरुचुस्तपनीयरत्न
दीप्तानि मूर्धसु शिरोमणिमण्डलानि ।
सीमन्तभल्लकवरैस्सममर्पितानि
चर्माणि पुष्पधनुषेव जगज्जयान्ते ॥ ॥25॥

शिरस्सु मुक्ताफलजालकानि स्फुरन्ति चक्रायुधसुन्दरीणाम् ।
मुखत्वमाप्तस्य समीपदेशं प्रियस्य भानीव समागतानि ॥ ॥26॥

ताटङ्कभासःकुटिलालकानां स्फुटाङ्कपोलेषु नटन्ति तासाम् ।
तदा जगन्नेत्रवतंसितं श्रुति प्रभूषणत्वाप्तिमहामुदेन ॥ ॥27॥

In Public domain. Digitization Muthulakshmi Research Academy

मुरान्तकस्त्रीधृतहीरहारा विरेजिरे कञ्चुकवागुरासु ।
निरुद्धचक्राह्वयपक्षिजग्ध्यै दत्ता इव स्वच्छमृणालनालाः।। ।।28।।

नासाग्रसीमसुतदानवमौक्तिकानि मन्येऽर्पितानि नगभृन्मदिरेक्षणानाम् ।
कन्दर्पखेलनतरङ्गितमन्दहास मन्दाकिनी प्रभव निर्मलबुद्बुदानि।।29।।

कृशानि मध्यानि कुरङ्गनेत्र्यः काञ्चीभिरासेचनकप्रभाभिः।
बबन्धुरद्रिस्तनभारभग्नान्याशङ्क एव स्युरतिप्रगाढम् ।। ।।30।।

मणिमयवलयानां मध्वरेर्मानिनीनां
करकिसलयभूषाकल्पनं कल्प्यते स्म ।
स्वविलसनविभूत्यै सर्वसर्वंसहाया
भवति हि महता सम्भावनोत्कर्षहेतुः।। ।।31।।

गरुत्मध्वजकान्तानां चरणाम्भोजसेवनात् ।
निबिडोत्कलनिह्लादाहंसकास्सञ्चकाशिरे।। ।।32।।

एवमनन्योपादेयग्रैवेयतुलारहिततुलाकोटिप्रायैरहेयैः कृतकेतरमणि-भूषणैर्धृतवेषाभिर्योषाभिस्समं समन्धरधारीसुरापगातीरवानीरवञ्जुलमञ्जुल-च्छायाभिरञ्जिते सञ्जात कलहकलविङ्ककपोतपोतनिर्धूतपल्लवतल्लज मल्लीमतल्ली भवनेषु वनजेषु लास्यावश्यकवासन्तिकायामानान्तर्विहार्यमाण मानवतीसहचरो विमानचर निकरसुरतपरिमलमिलितरसालय रसालय-मलप्रसूनवासनापहृतनासेन्द्रिय पुष्पन्धय झङ्कारमुखरिततहरिदन्तरेषु वनान्तरेषु स्वैरं विहृत्योदन्यानन्य हृदयानां सहृदयानां मोदमावहन् सकलजन-दाहापहारिणीं वारुणीमचिन्तयत् ।

In Public domain. Digitization Muthulakshmi Research Academy

तेन स्मृताम्भोनिधिराजकन्या प्रवाहरूपेण पपात धात्र्यां।
सा वाहिनी सालमुखात्स्रवन्ती रराज गङ्गा गगनाच्च्युतेव ॥ ॥33॥

सा सैन्धवीमाधवयोषितानां चकार नेत्रोत्सवमापतन्ती ।
समीरिणोत्प्रापितफेनपुञ्जैस्सहस्रचन्द्रं वियदूहयन्ती ॥ ॥34॥

माधुर्यतस्सूक्तिमजाङ्गनानां भ्रूविभ्रमं वीचिभिरर्जुनेन ।
स्मितं महावर्तशतेननाभीर्जैत्रीव सा सीधुधुनीससार ॥ ॥35॥

एवं स्रवन्त्यां मधुस्रवत्यामशेषायोषास्सुवेषास्सीधुं पिबन्त्यस्साधुभर्त्रा सहसहेलं सश्लाघाशिरः कम्पम्पिपासयासमन्त्रपामपास्योच्चैर्जगुः॥

ईशितुस्सकलधार्मिकभर्तुस्सीधुपानकरणं न विरुद्धम्।
दुर्लभं घटयितुं दृढशक्तेर्दुष्करस्य करणं किमु दोषः॥ ॥36॥

तत्रान्तरे ब्रुवति योगिनि गूढचारा
वृत्रारये समभिवादनपूर्वमूचुः।
देवप्रसीदविजयोऽस्तु मुहूर्तमात्र
मस्मद्वचश्श्रवणकौतुकवान् भवस्व ॥ ॥37॥

आकर्ण्य चारवचनं मुनिनाथवक्त्र –
निष्यन्दमाणवचनामृतपानसक्तम् ।
कर्णं निवृत्य स च तद्वचसां विधेयं
तूर्णं बलात्सुमनसामधिपश्चकार॥ ॥38॥

गजरिपुनिशिताङ्गुलाग्रभिन्नद्विरदशिरोगलितप्रधानरत्नैः।
अपरजलधिसीम्नि हेमकूटो विजयति मौक्तिकसानुमत्प्रतीतिः॥39॥

In Public domain. Digitization Muthulakshmi Research Academy

अस्ति तस्मिन्नगपरिवृढे विविधमणिमयश्रुङ्गश्रुङ्गाटके निरामयापुरी मयापादिता प्रतिदिनजालमार्गान्तर्गत सुधांशुसाङ्गत्यसञ्जातकिसलयविशदसौध-पटीरदारुमती हेमवती नाम यामवतियामवतीचरविभुःकम्बुकर्णः ।

तस्मिन् वसत्यरिपुरी विजयोत्सवेषु
भेर्या रवान्प्रविदधात्यभिधावशिष्टान् ।
यस्योपहारशयराजगमागमोच्चैः
कोटीरसङ्घटनसञ्जनितो निनादः।। ।।40।।

तन्मित्रमद्भुतचिरन्तनदेवरक्ष-
संस्ख्याम्बुराशितरणोरुशिलोरुशीलः।
यस्याङ्गुलाग्र्यनखसीम्न्यचलामहन्तः
प्रापुस्व नामसदृशं स्थितिमप्रेयाम् ।। ।।41।।

रणमुखे जितशम्बलनामिकस्सदशदिग्विजितोरुभुजाबलः।
कलहभुग्यमिनः कुलटाप्सरस्समुदयस्य च मानसपूरकः।। ।।42।।

एकस्मिन्नवसरेन वरोजनी राजनी राजितायां प्राच्यां राकाशशिनिकाशकनक शलाकाशतप्रकाशित सितातपत्रच्छायाभिस्सेव्य-मानः लोकालोकविदिताडम्बर शम्बलप्रमुखनिखिलदनुजयूधनाथसम्भा-वितायां सभायां सयामिनीचरविभुः प्रविष्टाष्टापदविष्टरः निजाराम - रामाद्भवदारामगामिनीमनुगतकामिनीमिन्दिन्दिरसन्दोहमालिकामालोक्य विस्मयमपृच्छत् ।।

अहो! विचित्रं किमिदं वदन्तु भवन्त उद्यानचयं विहाय ।
विहायसा गच्छति भृङ्गपङ्क्तिः पूर्वाभिकाकज्जलनीलकान्तिः।।43।।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र कश्चिदेवं प्रत्यवादीत्।

पुरन्दरवराङ्गणाभरणपारिजातः स्रवन्
मरन्दलहरीस्फुरत्कुसुममञ्जरीलोलुपः।
मिलिन्दनिकरश्चरेदधिपपौष्पमन्यत्कथं
सिताघृतमिलित्पयोमधुरविद्यवागूमिव।। ।।44।।

तन्मुखेनैवमावेदितवृक्षपञ्चकप्रभावो विभावरी च रविभुरेतैरनोकहैः स्वाराममभिरामं कर्तुमनाः प्रधनायागमिष्यतीति ।

श्रुत्वाचारवचोविचारितमनादत्वा धनं प्रेमतः
कृत्वा संयमिने नमस्सविनयं स्मृत्वा बलं वैरिणाम् ।
गत्वैकान्तनिशान्तमात्मसचिवान्नीत्वाग्निकालाब्धिराड्य-
क्षेशान्मखवान्युतं च धिषणं रक्षःकृते मन्त्रयत् ।। ।।45।।

आयाति राक्षसपतिः खलु नोजयायोपायः
कथं स च बलीबलवत्सहायः।
किं वा विचार्यत इतः किमुवक्ष्यतेव
किं वा भवत्करगतस्सुरराज्यभारः।। ।।46।।

इत्थं ब्रुवाणं त्रिदशाधिनाथं कृताञ्जलिः प्राह समीरमित्रम् ।
युद्धेपवौशत्रुगलौसृगाक्तै ह्युद्धार्य तिष्ठत्यरिभिः कुतस्स्यात् ।। ।।47।।

अयं सुतस्तेरिपरंपरासु लताततोच्चाटनगन्धहस्ति ।
मृथाङ्गणे राक्षसतूलराशौ स्व तेजसा मां प्रकटीकरोति ।। ।।48।।

दम्भोलिधर्तुर्युधि जम्भवैरिन् कुम्भीशमारुह्य निजं विहर्तुः।
कुम्भीनसारातिरपि प्रसह्य स्तम्भीकृताङ्गो भविता तवाग्रे ।।49।।

In Public domain. Digitization Muthulakshmi Research Academy

अङ्गारधानीं रिपुराजधानीमङ्गीकुरुत्वं नयनैस्समग्राम् ।
सङ्क्रन्दनाक्रान्तमदिय्यकीलकलापभूषीकृतसौधमालाम् ।।50।।

इति ब्रुवति पावके धृतिमतां सतामग्रणी–
र्जगादसमयोचितं यमनियामकः पावकम् ।
प्रशस्य धरणीधरोध्दतिविनाशितो नो भव–
न्निदेशमभिकांक्षतामरिवधे निरोधो महान् ।। ।।51।।

पाशायुधोऽपिवलयं विरचय्य पाशं
धुन्वन्नवोचदसुरागतिरेव मिथ्या ।
स्याच्चेन्मराविवकरेमनुतर्षितस्य
पाशस्य सम्भवतु शत्रुलासृगम्भः।। ।।52।।

धनपतिरिदमूचे दानवांस्तद्विपक्षान्–
घनपथसुमनोभिस्तुल्यरूपान्विधास्ये ।
अथपुनरपि तेषामप्सरः प्राप्तिहेतो –
र्भवति तव नगर्यां युद्धमित्यस्ति मे भीः।। ।।53।।

एवमेवं निजप्रतापसूचनामाचरद्भिर्वियच्चरवचनैरुन्मिषिततैर्यः पुरन्दरो गीष्पतिमाभाष्येदमाबभाषे ।

एतावदुक्तं श्रवसोस्त्वदीययो–
स्समीपमापन्नमभूत्प्रियं खलु।
वदावदास्त्वं यशसा वदान्य भो !
वदावदातीकृतलोकसप्तक ।। ।।54।।

मेघगम्भीरया वाचा श्लाघनीयगुणाकरः।

In Public domain. Digitization Muthulakshmi Research Academy

परमार्थं वचः प्राह पुरुहूत पुरोहितः।। ||55||

शूरधर्मं समाश्रित्य वीरवादान्वदन्ति ते ।
वयं त्वालोच्य बहुधा नयेन निगदामहे ।। ||56||

षड्गुणैः परिवृतो यदि राजाशक्तिभिस्तिसृभिःपरिपूर्णः।
वर्गविच्चतुरुपायसमृद्धिः साङ्गराज्यमभिपाति सतेजाः।। ||57||

यदि मन्त्रिणि निक्षिपेत्स्वराज्यं विषयासक्तमतिः प्रभुस्समग्रम् ।
विवराणि विमृश्य शत्रुमित्रं सचिवस्तं द्विषतां वशं करोति।।||58||

लोभाद्भटानां यदि वेतनादिर्न दीयते राजवरेण तैस्तैः।
विसृज्यते सौरतपाटवाल्पः प्रियो यथावासव कामिनीभिः।।||59||

क्षितीशिताचेद्धनकोशशून्यस्तं नानुमोदन्ति समेशितारः।
भर्तारमुद्यद्वयसापरीतं वृद्धं समस्तेन्द्रियपाटवोनम् ।। ||60||

धैर्यच्च्युतं निर्दयया जहाति श्रीःकामिनी षण्डमपण्डितं वा ।
तमैकपत्न्यं व्रतमाचरन्ती साध्वीव कार्पण्यदशानुयाति ।। ||61||

विमृश्य कर्ता यदि मेदिनीशः स्त्रियोऽनुगृह्णन्ति न तर्कितं तम् ।
करोति चेत्कर्मविपक्षवत्समभीक्ष्णमज्ञातबलाबलस्सन् ।। ||62||

रक्षोगणः कपिबलप्रथितप्रशस्ति–
र्विक्षोभयेदखिलदेवपुरीमिदानीम् ।
तस्माद्धरिं कपिबलप्रथितप्रशस्ति
मस्माकमग्रगमनं प्रधनेषु कुर्मः।। ||63||

In Public domain. Digitization Muthulakshmi Research Academy
एवं बृहस्पतौ वदति सति शतक्रतुस्सामोदित शिरःकम्पमभाषत ।

सत्यं सत्यं सम्यगुक्तं भवद्भि र्निर्गच्छाम श्रीसखं नेतुमत्र ।
भूमावास्ते चक्रपाणिस्ववासा दैत्यक्रीडन् रम्यपुर्यङ्गनाभिः।। ।।64।।

आलोच्यैवं कालपाशायुधाद्यैश्चारं पश्चात्फालसामीप्यमर्थात् ।
जोषं जल्पन् प्रेषयित्वा नयेति स्वाराडाप्त्यै रावणोगान्मुकुन्दम् ।65।

आगत्य तां मधुरिपोर्मधुपानलीला-
मालोक्य नन्दनसुमानि मुदश्रुधाराः।
स्तुत्या रवांश्च युगपन्नगभिद्व्यमुञ्च
दैरावतस्थितिमपि प्रतिपन्नभक्तिः।। ।।66।।

तिष्ठन्निरालम्बतया मरुत्वान् स्पष्टीचकार प्रधनस्थितिं स्वाम्।
रक्षोगणाभ्यागमने भवित्रीं तथाविधां तं शरणं व्रजन् खे ।। ।।67।।

यन्नाभिपङ्कजमुदञ्चितभारतीश
वक्त्राम्बुजं वनधिजावनजेक्षणायाः।
पुष्पेचतुष्कुसुमसम्भ्रमविभ्रमायाः
क्रीडाम्बुजे जनयति स्म मुहुर्जिहासां ।। ।।68।।

यच्चक्रमाशररणेषु विपक्षजालं
ज्वालाभिरुन्नमितपर्वसहस्रजाभिः।
निर्दग्ध्यखेलयति कीर्तिवधूमनन्यां
कङ्कालराशिरजिताद्रिषु दुर्निरोधम् ।। ।।69।।

आप्राकृताब्जनयनामिषवेषयुष्म-
ल्लीला विधाय विकलेन्द्रियमञ्जसस्सः।

In public domain Digitization Muthulakshmi Research Academy

स्थाणुं गिरीशमपि सर्वविजेत्रमित्थं
साधारणत्वमतनोत्प्रथितं जगत्याम् ।। ।।70।।

विनतात्मविपक्षोऽपि विनतात्मजपक्षगः।
नमस्तनोम्यहं तस्मै समस्तारिप्रणाशिने ।। ।।71।।

इत्यादिस्तुतिसाहस्रैरत्यादित्यप्रभं वृषा ।
प्रसन्नं विदधाति स्म हसन्नीरजलोचनम् ।। ।।72।।

तदनु स्मितचन्द्रिकया दिशो दशविनिर्मलयन् कमलेक्षणः।
हरिरुवाच पुरन्दरमादरादहितजं भयमस्ति न ते खलु।। ।।73।।

निशम्य तद्वाक्यमहार्यवैरीनिशाचराणां गमनं रणाय ।
भवत्यतस्त्वत्पदसन्निधानमुपागतोऽहं वरयन् सहायम् ।। ।।74।।

इति वदति मरुत्पतौ प्रणम्य प्रभुरपि तं जगतामिदं जगाद ।
सगणमपिहरं समानय स्वप्रधनभयं न लभाहमागमिष्ये ।। ।।75।।

दत्ताभयस्सुरपतिर्दयया मुकुन्दा
त्कृत्तारिवामनयनाकुलकुठं सूत्रात् ।
वित्तानुसारमभिपूज्य विकासमान
त्ताम्बुजस्सहगणैस्स्वगृहं जगाम ।। ।।76।।

इति श्री याज्ञवल्क्यशाखाफलायित काश्यपगोत्र
श्रीमत्केशवसूरिपुत्रश्रीजगन्नाथार्यकृत चम्पूप्रबन्धे
द्वितीयोऽयं स्तबकः।

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयस्तबकः

अथ जगत्पतिरात्तनिजायुधस्समररङ्गविहारसमुत्सुकः।
निजवधूविहृतिं स समाप्य सत्वरमभूद्गमनाय धृताशयः।। ।।1।।

सङ्कल्पमत्राप्तसमीपदेशं पतत्पतत्रेश्वरमाशरारिः।
समारुरोहाहवसव्यसाचिस्सुमेरुधीरस्तपतां स मेरुः।। ।।2।।

पक्षोद्वीचित वातवेगविचलद्धर्माद्रिमन्थाचला
दिक्षोणीधरमत्तवारणघटाहर्यक्षकाकुस्वनैः।
विक्षोभङ्गतदिग्गजं बधिरितत्रैलोक्यमब्जेक्षणः
पक्षीन्द्रेणविधीयतेस्म नगरप्रान्तं क्षणाद्वज्रिणः।। ।।3।।

तत्र कुत्रचिन्मृणालनालपाथेयादायाभियुध्यद्राजहंसकोलाहलवाचालितलोकालोकम् आलोकमात्रातिमात्रदर्पकावेशपरवशीकृतत्रिभुवनारामवतीयुवती जनताहमहमिकाभिगम्यमानकृतनिमज्जनजनां दिविजमिथुनसमविषमानन्यजजन्योद्वर्तनपरिरम्भणादिचातुर्यपरितृट्यपतद्धारवल्ली सञ्जातरङ्गवल्ली विभ्रमतीर्थपथाञ्जलक्रीडासमासक्तनक्तञ्चरारिनारीकुचतटीपाटीरसमालोडनाति धवला बाल्यक्रीडालोलदेवभामिनी कोलाहलविनिद्रशारिका राजकीरनर्मालापानकल्पतरुपरिष्कृतां श्वसनशिशुसमाधूतलताभिस्सौरवारवधूनामिव लास्यमुपदेशयन्तीं भवानन्ददायिनीमप्यभवानन्ददायिनीम् आदितेयभागधेयवाहिनीम् अभ्रापगामद्राक्षित्सुभद्राजानिः।

नारीसहस्रदशनव्रणितारुणोष्ठ –
सामीप्यभाजनविषक्ततदीयरूपम् ।
द्वारि स्वरीशनगरस्य कृतारितापं
श्रीपः पुपूर वरशंखमघार्तिलोपम् ।। ।।4।।

In Public domain. Digitization: Muthulakshmi Research Academy

स्मरारिपुरशरत्रिकरसंहरणैकधिया
ज्वलदनलं त्रिशूलमुपरि भ्रमयन् नमयन् ।
प्रमथपिशाचभूतविकृतार्भटमूर्छित दिक्
समुदयमथाभ्यगात्सुरपुरीमधिरूढवृषः ।। ।।5।।

यस्य स्वयं जपति मन्त्रमतन्द्रवृत्ति-
र्यस्स्वस्य सायक अभूदरिमर्दनाय ।
तं वीक्ष्य वासवपुराङ्गणभूषणं त-
त्पादावतं शितशिराः कुतुकीव्यतिष्ठत् ।। ।।6।।

पाञ्चजन्यनिनदप्रतिलब्धोदञ्चदब्जनयनागमसंवित् ।
पञ्चपञ्चशतदृग्परिपूजाचुञ्चुरत्वरयदाश्वभिगन्तुम् ।। ।।7।।

वृद्धश्रवास्समधिगम्य सनृत्तगीतवाद्यन्तदातमसितेतरसेव्यमानम् ।
नीराजयन्मकुटभाभिरपूजयत्तत्पादौ सहस्रनयनाच्छबिसप्रसूनैः।।8।।

उत्पाद्यषोडशविधैरुपचारभेदै -
र्मोदं विभोर्भिदुरभृन्निपफाणनम्रः।
मां पाह्यनन्यशरणं करुणाकरेति
देवोऽपि भास्वदुरुदेवसभां विवेश ।। ।।9।।

सनिवेश्य निजासने मुकन्दं धनदाराढ्यमनन्तरासने च।
समवेशयतानुगान्निवृत्तात्मा कयानावतरान्वरासनेषु।। ।।10।।

देवारिमर्दनसमुत्सुकदानवारि-
वाग्धोरणिश्रवणनिर्भरकौतुकस्य ।
शूरव्रजस्य गणिकासुदतीजनस्य
तत्राविरास भुजयोस्स्तनयोश्चकण्डूः ।। ।।11।।

In Public domain. Digitization Muthulakshmi Research Academy

अमरनगरीं या ते पीताम्बरेऽथसुरेशितुः
कदनवदने कर्तुं धर्तुं वशञ्चयशश्चिरः।
अमितविमतान्भद्रां निद्रामपास्य पतिव्रता
रमणचरितं स्मारं स्मारं विवासमनीनयत् ॥ ॥12॥

निरन्तरायमागच्छत्तुहिनकिरणकरपातस्सरोरुहनिकुरम्बमिव मामपि किं वा करिष्यतीति भीत्येव तस्कर इवाहस्करः चरमगिरिगहनसीमान-मगाहत ।

अन्यासङ्गापराधप्रियकुपितवधूजायमानानुराग-
स्सान्योन्याश्लेषबद्धादररथचरणाख्यं वचेद्यद्विराश्यम् ।
धन्यं मन्यच्चकोरोदरविदलितकल्हारपुष्यत्वरो
वन्यव्रातप्रभूतार्भटरवमुखरः प्रोदगात्सान्ध्यरागः॥ ॥13॥

अस्ति शिखरिकनकशिखरनिकषणदिवाकरबिम्बस्स्रस्तरजोराशिरिववरुणराजधान्युचितमणिवैजयन्तीकुसुम्बाम्बरविसर इव वरुणदिगङ्गना-नूतनरघातस्रवदसृग्धराधरप्रभापटल इव वरुणमहाधिराजविहरणविश्व-कर्मक्रीडाम्बुजरागवेदीतट इव सन्ध्यारागो व्यराजत ।

तदा पकुवलयचरदलिकेरवरमिलितपिकादिनादो भाति। विततचकोरी नूतनरतिकेल्युद्गीतसङ्गीत इव ।

तदन्वसृग्भ्रमयानिशापिशाचिकयानिश्शेषं पेपीयमान इवमत्तः प्रथमं प्रधावद्धामनिधेः पूर्वं पूर्वे प्रभवितव्यमिति पश्चिमवाराकरमार्गं प्रविशन्निव रत्नखिनीभ्रान्तिमताकालतस्करेण शकलीकृत्य नीयमान इव सन्ध्यारागो मुमुहूर्तादन्तर्दधे।

In Public domain. Digitization Muthulakshmi Research Academy

पुंजं यदञ्जनमहीध्रगुहान्तरेषु
क्षिप्तं तमालतरुकोटरपेटिकासु ।
न्यस्तं तथोत्पलदलेषु च तत्समस्त-
मस्तङ्गते दिनमणौ तिमिरं रराज।। ।।14।।

मार्ताण्डपश्चिमजलाकरपाततुष्य-
द्योषित्पयोधरमिथः कषणाद्विशीर्णम् ।
मन्दानिलेन दशदिक्षु विसार्यमाणं
कस्तूरिका रज इवोच्चक मे तमिस्रम् ।। ।।15।।

तदा नभसि रेजिरे रुचिरतारकापङ्क्तय-
स्फुरत्तरलमौक्तिकारचितरङ्गवल्लीसमाः।
कलानिधिमुखोद्यमद्धवलचन्द्रिकाबुद्बुदा-
इवोग्रनटनोद्गतस्फटिकशैलखण्डा इव ।। ।।16।।

वारुणदिगङ्गनायास्संसर्गेणानुरागिते याते ।
प्रेयसितमानिनीषुग्लौः पद्मिन्येवार्थितोऽभ्युदगात् ।। ।।17।।

किं व्योमनिर्मलसर किमु तारकाणां
बृन्दं तदन्तरुदितं किमु पौण्डरीकम् ।
शुभ्रांशुरेषसितपक्षसमग्ररूप-
स्तन्मध्यदेशविहृतिं गतचारुहंसः ।। ।।18।।

व्योमयमुनाकुमुदेष्विवतारागणेषु विजृम्भमाणेषु मध्यमलोकमखिलं धवलेतरगुणाभावं कुर्वतीव शर्वरीपतौ प्रतिक्षणशतगुणप्रवर्धमान-चन्द्रिकासारमुद्भावयति विरहिजनमर्मविदाहाय मुर्मुरमिव निर्मितं परस्पर-विश्लेषासहिष्णुप्रमदचङ्क्रमितचक्रवाकमिथुनमिथस्सन्दर्शनाभावकरणनिपु

In Public domain, Digitization Muthulakshmi Research Academy
-णमोषधीचूर्णमिव निर्मित कुवलयपराग मलयानिले दिशि दिशि प्रसारयति समदकुमुदसमुदयस्यन्दन्मरन्दपानतुन्दिलेन्दिन्दिरझंकारसङ्कोचितेषु जार-सङ्केतिकागारसञ्चारिकाभूरिभूषाझणत्कारसंरावेषु निर्भयसूचनाविर्भव विसृज-त्सिंहनादसौविदल्लसम्बाधित द्वारेषु निजपटकुटीरागारेषु वारिजाक्षपक्ष्मलदृ-ग्वर्यः अवार्यमाणविरहभरमृदितमृदुलाङ्ग्यः पूर्वानुभुक्तभोगभागधेयकथा-सल्लापिन्यः दूरितदुरिताभद्रां सुभद्रामाश्रित्य तुहिनकिरणमणिमय- वेदी तुलने गङ्गापुलिने निषेदुः।।

तत्रैकाह स्वसखीः विरहोद्रेकात्प्रदूयमानाङ्गी।
मलयजपवनहिमांशुद्युतिसंस्पर्शप्रभूतनिर्वेदा।। ।।19।।

सख्यो जल्पथ किं सदा गतिरयं प्रच्छन्नरूपोऽङ्गज-
क्ष्माधीशानुचरश्चरत्यविदितं वक्ष्येत राज्ञे तराम्।
तद्राजाप्रथितश्च दूरपतिका मृत्युःकिलाब्जानित
द्वाणास्तद्व्यसनं च दुस्सहमिति प्राचां हि वाचः श्रुताः।। ।।20।।

आयातीक्षु धनुर्धरः कथमये! हा योषिते! श्रूयते
सन्नाहः पिककीरजस्सखिसखि स्यान्नाम किन्नो भयम्।
यात्यन्यत्र कुतश्चिदत्र यदि वा प्रायाति चेत्तच्छरा-
स्तन्नेत्रान्तदृशां बलाबलपरीक्षां किं न वा कुर्महे।। ।।21।।

हे कञ्जायतलोचना रहसि मां प्रस्तावयध्वं विभो-
स्सामीप्येविविधोपरत्युपचिते काले कदा वा हरेः।
कन्दर्पस्य शराः पतन्ति निशिताः कञ्जारिरुच्चैः करै-
र्देहं दाहयते सवश्च चलिता जीवामि म्रिय्येऽथवा ।। ।।22।।

In Public domain. Digitization Muthulakshmi Research Academy

एतत्कुलीनाश्च मृताः कृतज्ञा विधोर्वधूनाशकृतो न मृत्युः।
पापी चिरायुस्सुकृती गतायुरेषा मृषा किं हि विदां सदुक्तिः।। ।।23।।

वयस्ये दोषेशो मलिनहृदयः प्राथ्यर्माणोऽप्यजस्रं
निजैर्ज्योतिःपुञ्जैर्जलनतुलनैर्बाधयत्येव तीव्रम्।
तथा तत्स्याद्द्वित्रिप्रहरणधरो नामतो नन्यजो नः
प्रसूनास्त्रैः कोपादहहपरितो बाधते किं सहेयम् ।। ।।24।।

कितवमदन किं वृथा वधूनां
परितपनेफलमुज्झिताङ्गनानाम् ।
कठिनहृदयिणां प्रवासिनां त्वं
जहि जहि मानसमस्ति शूरता चेत् ।। ।।25।।

कुवलयेश सतां शरणत्वादुडुपतानसफलाह्यबलानाम्।
विरहवारिनिधौ पतितानां फलमबाथसमुद्वहनाद्भवेत् ।। ।।26।।

नाथेन सत्सुरतसङ्गतिषूत्पलाक्ष्य
स्सत्यं भवन्मुखसुहृद्विधुरित्यफाणि ।
बाधान्तनोत्यकरुणं बहुधा स एष
मित्रोदये हतरुचेः कुत एव मैत्री ।। ।।27।।

विप्रयोगिजनोन्मूलक्रियोत्साह्ययमीड्यते ।
सुरद्विषः पुण्यजनख्यात्येव द्विजराडिति ।। ।।28।।

बाणास्सुमान्यात्मभवः प्रहर्तासुधाकरस्तापकरो बभूव।
देवे वरे दूरगतेऽनुकूलं भवेद्धि सर्वं प्रतिकूलमेव ।। ।।29।।

In Public domain. Digitization Muthulakshmi Research Academy

एवमसन्निधानप्रेयसीषु युवतिषु विलापं विलापं तासु चिन्तामहित निश्वासशोषिताधरं बहुयुगवद्यापयतीषु समाश्रितमहदाश्रयामपि भर्त्सयन्त्यः कामिन्यः राज्ञो भावे कृतापराधिनीं मामपि निगृह्य किमकर्तुमुत्सुका इति सङ्कल्पेनेव चन्द्रिकाग्रत एवान्तर्दधे।

राजापि पद्मिनीघातजातपातकपरिभूत इव चक्रराजमिथुनविश्लेष-दोष परामृष्ट इव विरहिणीरोषकषायितदृगुल्कापरिदग्ध इव प्रोषितभर्तृ-काशापो पहत इव गगनगहने कालचारेण गृहीतवसुरिवप्रभातवातकितवेन परिहृतांशुक इव विवर्णो जगाम ॥

क्षेमसमयश्चक्रवाकाणां क्षामसमयश्चन्द्रिकापायिनां निद्रासमय-स्सुरतविह्वलविलासिनीनां कारोत्क्रमणसमयः कमलमधुपानां ध्वारोद्घाटन-समयश्चेन्दिरामन्दिराणां प्रबोधसमयः प्रद्युम्नहयानां विजृम्भसमयः पुष्पेषु सायकानां सङ्कल्पावाप्तिसमयः कलहान्तरितानां नायिकानां मलयपवमान नीयमानतामरसपरागाभिपतत्पुष्पंधयारावमुखरितहरिज्जालः प्रभातकालः प्रादुरासीत् ॥

उपपतिसुरतावाश्लेषलूनस्तनान्त-
र्विषमित मणिमुक्ताहारजालामहेलाः।
निजविभुभवनानि प्रापयिष्यन्ति दूत्यः
पतिभयकृतचिन्ताः क्वापथैर्वेपमानाः॥ ॥30॥

मानिन्यः प्राणनाथाकलनविघटना हेतुभूते प्रभाते
पीनस्तन्योऽनुरागादृतहृदयपुटागाढमाश्लिष्टकण्ठाः।
प्रेयोवक्षोनिखातस्तनकलशमुखाश्चोरुषूमान्प्रयुङ्त्वा
स्वापं कुर्वन्ति सौधस्थगितशशिशिलाधारपाताप्तसौख्याः॥ ॥31॥

In Public domain. Digitization Muthulakshmi Research Academy

हर्म्योर्ध्वभागसुरतान्तसुखप्रसुप्त-
द्वन्द्वश्रमो दकलवैस्सुमनोरजांसि ।
चञ्चन् प्रभातसमयोदितवातपोतः
पञ्चेषु वह्निमलसंज्वलयन् चचार ॥ ॥32॥

कोकानां विघटत्सुहृज्जनवतामानन्दयन्मानसं
पङ्केजानि विकासयन्निशिचरप्राबल्यमुद्बोधयन् ।
घूकानाकुलयन् चकोरविततैर्वैरास्यमापादयन्
सद्यो निष्प्रभतां दिशन् शशभृतः प्रद्योतनः प्रोदगात् ॥ ॥33॥

भूरुड्भाचापलाशान्तरसुषिरमनोहृद्गवाक्षायनेभ्यो
भास्वत्यंशून् चिराय प्रकटयति ततः पद्मिनः पद्मगन्ध्यः।
चेतश्चेतो भवेन प्रदलितमहाहान्योन्यमाश्वासयन्त्यः
काल्यं कृत्स्नं विधाय प्रविविशुरचिराच्चेलगेहान्तरालम् ॥ ॥34॥

तदा कम्बुकर्णनामा शम्बलसहायवान् मानवाशो दानवाशोकवदान्यः दूतमुखज्ञाताखिलमखभुगीशप्रवृत्तिः मत्तवारणोत्तमहयसत्तमरथपदाति निबिडाम्बिडौजः पृतनाप्रतिनिधिं वरूधिनीं योजय मे जयायेति व्याजहार वाहिनीशम् ।

स्येनमुख नामा सेनानाथोऽप्युद्धृताशरपतिशासनःदुर्वारसुपर्वगर्व-निर्वापण चतुर चतुरङ्गसङ्गराभङ्गुरव्यूहां वाहिनीमानीय राज्ञे व्यजिज्ञपत् ॥

प्रकम्पितगुहागृहं पटुभटार्भटाक्रन्दन-
द्रवत्सिवसमूहसङ्गतमदेभपञ्चाननम् ।
सुमेरुगिरिमञ्जसा चकितकिन्नरीविश्रम-
न्नमेरुमभिपेदिरे दनुजयूधनाथर्षभाः॥ ॥35॥

In Public domain. Digitization Muthulakshmi Research Academy

नवकोटिधनुष्मदुत्तमानां नवकोटीररुचानि चोलिताङ्घ्रिः
दनुजन्मपतिस्ततस्समन्तादनुजन्मात्मसुहृद्युतः प्रतस्थे।। ।।36।।

निशाचरेशो निखिलं वरूथं निवेश्य मेरोश्शिखरे विशाले।
दूतं विधूतारिभयं न यज्ञं स प्राहिणोद्वृत्रहणस्समीपम् ।। ।।37।।

तदन्वसमर्पितकल्पकाय तुभ्यमभ्यधिकं संख्यमसंख्यकल्पं दास्यामीति विजजिज्ञित्पतिवाचानि चेतरतेजा बिडौजास्तदेवास्मत्सङ्कल्पमिति दूताय प्रत्यादिदेश।

श्रुत्वाचारवचप्रपञ्चितदिवौकस्सांख्यगर्वोद्धतिं
प्रख्यातोग्रकृपाणपट्टसगदाकुन्ताद्यनन्तायुधान्।
यूथान् चोदयति स्म राक्षसपतिः कोपानलोद्वेलित-
स्तत्रासीत्कलहाशिनः श्रवणयोरानन्दनं क्रन्दनम् ।। ।।38।।

ततो मरुत्वान्जगदीशपादसरोजरेण्वञ्चितफालरक्षः।
रक्षो वधाय प्रययौ मयूरध्वजाभिनीतध्वजिनीसमेतः।। ।।39।।

प्रधनदुर्दमदुर्मदविक्रमस्फुरणदारुणवारणपङ्क्तयः।
निरगमन्नगपक्षभिदग्रतः स्वगतधर्ममुचस्त्वचला इव ।। ।।40।।

प्रशिक्षिततुरङ्गमप्रकरपञ्चधारागमा
गमोत्थखुरनिस्वनैर्भरतशास्त्रमुच्चावचम्।
पदे पद उदीरयन् प्रधनवेदिनस्सादिनो
रणे त्रिजगतां मनोरमचमू नटीनिर्गमे ।। ।।41।।

पक्षप्रभञ्जनसमुद्भमितैर्विहाय
स्सेनाभियानजनितैः पिहितं रजोभिः।

In Public domain. Digitization Muthulakshmi Research Academy

तादृग्विधैरमरनिम्नगमापयोभिः
जम्बालयन् तदनु विष्णुरथश्चचार॥ ॥42॥

भ्राम्यत्कृपाणकरभीकरवीरभद्र-
भेतालभैरवमुखप्रमथाभिगुप्तः।
आस्कन्दनप्रतिहतानिलवेगमृक्ष
मूर्धाभिषिक्तमधिरुह्य हरोभ्यधावत् ॥ ॥43॥

चटुलभटार्भटनिरोधितकरिबृंहितं बृंहितसंहृतनटद्घोटकहेषं हेषा-निषेथितधानुष्कधनुष्टङ्कारं टङ्कारसङ्कोचितानेकवादित्रनिनादं नदत्किङ्किणी-सङ्कुलवैजयन्ती पटाश्चलवातोज्जृम्भितकरटिदानधारा निरस्तसमस्त-गर्वाखर्ववीरकरतलचलत्प्रहरणकषणजातजातवेदसं सुनाशीरसैन्यमदैन्य मरोचत॥

ततःपिशितामृताशचारा निरातङ्कमरातीन् परस्परमाह्वयन्तोऽसह्य विक्रमोपक्रमाः भिन्दन्तो गदाभिश्चिन्दन्तः कृपाणैस्सूदयन्तश्शूलैश्छेदयन्तः परश्वधैःक्षिपन्तः क्षेपणीभिर्देह्याहवमिति पीडयन्तो दन्तुरमन्तचिन्तनानन्त-रितरोषदोषरणतृणायितप्राणाः प्रवीणाः कोणाहतपणवपाणितालावार्य-तूर्यारवबधिरित ककुभन्तरालं कामिनीभूत भामिन्यनूनाधिकसमर्प्यमाण-रुधिरासवसेवनजनितमदघूर्णायमाणनिशाचरपिशाचराजश्लाघास्पदमोहिनी-लास्यङ्कबन्धान्तःप्रविष्टशाकिनीढाकिनीहास्यलसद्विकृतास्य भूतप्रेतजन-कोलाहलदारुणं प्रविदारणमसाधारणं चक्रुः।

कदातिहारो लभितेतिशोचन्मदातिमांसादमृगोत्सवं तत्।
गदातिरोधानितकञ्जमित्रं पदातियुद्धं प्रबलं बभूव ॥ ॥44॥

In Public domain. Digitization Muthulakshmi Research Academy

एकश्शत्रोर्मुष्टिबद्धं कृपाणं प्राकट्येनोत्पाटयित्वारणोर्व्याम् ।
प्रादाद्दूरं न्यस्तगर्वाय तस्मै तस्याख्यां सम्बोधने सर्वलघ्वीम् ।।45।।

सादीकश्चित्प्रतिभटभटोद्वेगदोदर्शयित्वा
धाराः पञ्चाप्रतिहततरं शात्रवीयस्य हेतोः।
पञ्चज्वं प्रापैकया धारया स्वर्वारस्त्रीणां
रुचिरवपुषां प्रेमतस्मिन्न्वत्वम् ।। ।।46।।

समदगजविषाणभिन्नकायक्षत-
जधुनीविहरच्छकुन्तदुर्गः।
दिविजदितिजवन्दिमागधानां
दिशति हि सन्नुतिगायनेऽवकाशम् ।। ।।47।।

तदा विपक्षनिष्पेषितेषुरक्षस्संघेषु श्येनमुखशम्बलवीरसेनोल्कामुख-प्रमुखाधिकाः कम्बकर्णोऽपि शर्वरीचरसार्वभौमस्तदनुप्लवा जगदुपप्लवा नव-कोटिसंख्यावन्तोबलवन्तो धनुष्मन्तश्चाकर्षन्तश्शरासाना वर्षन्तो मार्गणा-नाचिन्वन्तस्सामन्तानाकुर्वन्तश्शूरालापान् महासेनमहानटसुनाशीरजयन्ता-दीननेक परानीकिनीदाहकनिजभुजप्रोत्साहनायेव गरुद्भ्यां नभस्वन्तं सृजन्तं गरुत्मन्तमारुह्य वसन्तं हरिं तमप्यनीकमावृण्वन् ।

स्येनवक्त्रशरजन्मनोस्तदा भानुदीप्रसमवर्मणोर्भृशम् ।
पश्यतां समितिदृङ्महोत्सवं प्रादुरास दनुजामृतान्धसाम् ।। ।।48।।

सन्दधत्प्रदरयोस्तदीय योस्सम्बभूव परिकृष्यमाणयोः।
कार्मुकप्रवरयोर्युधि ध्वनिः क्रौञ्चयोरिव घनाघनोद्यमे ।। ।।49।।

दिक्षु प्रवृद्धशरवर्षीति रोहितासु

In Public domain, Digitization Muthulakshmi Research Academy

कौक्षेयकेषु तटितां गणवत्स्पुरत्सु।
नेम्यारवेषु जलभृन्निनदभ्रमेषु
तत्र क्षयोत्थितघनाविव तावभूताम् ।। ॥50॥

तावुभावितरेतरशराभिघातक्षतजालिप्तमूर्ती प्रभावरी भावित पल्लवित पल्लकीवृक्षौ रणदक्षौ निर्निमेषजनस्यानिर्नायिकसायकसन्धानसमाकर्षण मोचनादिकर्माणौ सुवर्माणौ परस्परप्रत्यर्प्यमाणनिरर्गलमार्गणज्वाला कीलित भूनभोन्तरालौ द्विषत्करालौ विस्मयाब्धिनिमज्जद्विपक्ष सपक्षमनेकसाधन-मायोधनमकुर्वताम् ।

शम्बलोऽपि मायानिरोधितदिगम्बरस्त्वगम्बरमुपरुरोध ।

त्रिलोचनशरासनच्च्युतशराःपतं गोपमा-
स्तमिस्रमिव मूर्तिमत्स्थितमरिं व्यभिन्दन् तदा ।
सदा नववरस्स्रवत्क्षतजचर्चिताङ्गो बभौ
स्फुटोद्गलितगैरिकारुणनितम्बनीलाद्रिवत् ।। ॥51॥

आयान्तं प्रथितबलं बलारिसूनु-
श्शर्माणं रणभुवि वीक्ष्य वीरपूर्वम् ।
खण्डेन्दूपमनुकरोद्विकृष्य चापं
पूर्णेन्दुप्रतिमितमर्धचन्द्रयोगात् ।। ॥52॥

सवीरशर्मा रणनिर्विशङ्कस्सङ्कोचयन् सृष्टिमिवाट्टहासम्।
कुर्वन् ससर्जाशुगमात्तरूपं दर्वीकरं मृत्युमिवेन्द्रजाय ।। ॥53॥

धृत्वा शरानाशरचापमुक्ता नाभाष्य शत्रुञ्जगदे जयन्तः।
त्वदाशुगाः पुष्पवदस्पृशन्यन्मदाशुगार्तः प्रभवस्यनङ्गः।। ॥54॥

In Public domain. Digitization Muthulakshmi Research Academy

सवीरशर्मार्थिशशाङ्कबाणप्रविद्धमर्मोद्धृतकश्मलोऽभूत् ।
स्वसन्निवासो भवितेति योग्यस्थलोपयोगार्थमिवोद्गतोऽग्रे ॥ ॥55॥

उल्कामुखैरावणवाहनाजौ विभिन्नमातङ्गतुरङ्गयोधाः।
शताङ्गचक्राङ्गरथाङ्गपूगाः रक्तस्रवन्तीं रचयां बभूवुः॥ ॥56॥

हरिरपि शरवर्षात्पृष्टतोऽनुद्रवन्तं
रिपुममितसहायं चक्रपाणिस्सपुंखैः।
प्रदरशतसहस्रैस्सम्यगाविध्य बर्हि-
र्मुखनिकरसुमान्यं पाञ्चजन्यं पुपूर॥ ॥57॥

शरैरनेकैररिवीरमेकमेकेन बाणेन रिपूननेकान् ।
विध्वंसयन् गोशिशुसञ्चयेषु शिलाभिवर्षीव रराज मेघः॥ ॥58॥

कृद्धं श्येनमुखं तदा शरभवो युध्यन्तमुच्चावचं
बाणैर्व्यालकरालदन्तुरमुखैर्भित्वाच्छिनत्केतनम् ।
लूनं तेज इव स्फुरन्मणिमयं तन्निष्पतद्रक्षसां
साहाय्याभिपतद्दिवाकरधियं यज्ञान्धसां चातनोत् ॥ ॥59॥

सेनानीराशराणां ध्वजपतनरुषा प्रज्वलन्क्रूरमस्त्रं
सन्धायाकृष्यवक्षस्यमरबलपतेरुत्ससर्जास्त्रविद्वान् ।
तत्तत्राशु प्रविश्य स्वभुजविरचितं विस्मृतं क्रौञ्चरन्ध्रं
संस्मार्योर्न्निर्जगाम क्षतजमपि च हृच्छन्नकोपाग्निभावात् ॥ ॥60॥

मूर्च्छालिङ्गितचेतसं शरभवं सेनापतिं रक्षसां
ज्यानादेन निरर्गलं स्वविजयं विश्रावयन्तं मुहुः।
नैजं सैन्यमितस्ततःपरवशं प्रद्रावितं गोत्रभि-
त्सूनुर्वीक्ष्य तमभ्यधावदसकृज्ज्यां पूरयन् जित्परः॥ ॥61॥

In Public domain. Digitization Muthulakshmi Research Academy

जयन्तमालोक्य समाव्रजन्तं जयन्तमप्याशरसैन्यनाथः।
मेने मनस्स्वात्मवशच्युतश्चमेनेहजीवातुरितिप्रभग्नः।। ।।62।।

धीरञ्जयश्रीर्नजहाति तस्मादनेन योद्धव्यमतः परं स्यात् ।
जयोऽपि वा किञ्च पराजयो वा तावीश्वरायत्त निजप्रचारौ।। ।।63।।

इति मनसि विचार्य धीरबुद्धिर्दृतमभिचोदक चोदयेति रथ्यान् ।
शतमखसुतबाणजालधाराप्लुततनुरत्वरयत्स्वरश्मिहंस्तम् ।। ।।64।।

शस्त्राशस्त्रिसमीकलोलुपधियौ लक्षोपलक्षं शरै-
रेकं द्वेदशविंशतिश्शतमितिव्याघातयन्तौ मिथः।
नीरन्ध्रायुधपञ्जराभिरचनासक्तौ च तद्भेदनं
कुर्वन्तावति भीममद्भुतमुभावाचक्रतुर्विक्रमम् ।। ।।65।।

उभावपि निकृत्तवर्माणौ शिथिलितमर्माणौ पावकपैशाचैषीकसौर-वारुणाद्यनेक दारुणास्त्रसमागमज्वलितज्वलनज्वालावलयितलोकालोकौ दुस्सहालोकौ दैवस्याप्यगोचरजयापजयमास्कन्दनमकुर्वताम् ।।

शचीशभूस्सायकपञ्चकस्य प्रयोगयोगादभवत्समारः।
स्येनास्यसूतस्तदनीकभूमौ तेनाहतो गात्सुरसुन्दराङ्गीः।। ।।66।।

हतसूतहयस्तमीचरस्संयुतसूतोरुहयेरथे निविष्टः ।
अगराजभिदात्मजंबबन्धोरगराजप्रदरैस्सुहृत्परघ्नैः।। ।।67।।

उभावपि गुणारोपावुभौ विबुधसम्मतौ ।
तथाप्येको भवत्तत्र महाहीनवशं गतः।। ।।68।।

तत्काले रणकर्कशशिखिहयःप्राप्यसम्यतिं रक्षसां
सेनानायकमुज्ज्वलन्तमभितस्सप्तिनिर्षिक्ताग्निवत् ।

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यायाद्विकिरिण् शरान् बहुतदामायूरपक्षानिल
ध्वस्तास्सर्पशरास्समुज्झितमरुन्नाथात्मजा दुद्रुवुः।। ।।69।।

मयूरवाहागमनाद्विमुक्तभुजङ्गबन्धः पुरुहूतपुत्रः।
ज्याघेषविद्रावितदिङ्गतङ्गस्सुहृद्युतस्तं रिपुमारुरोध।। ।।70।।

समागतरिपुद्वयं निशितबाणवृष्ट्याकरो-
न्नवीन तरचालिनीसमतनुं निशाटाग्रणीः।
ततोऽग्रजसहायकृत्समिति वीरशर्माप्यरुक्
निजप्रदरविश्रमाकरगृहं तुराषाट्सुतम् ।। ।।71।।

ततः कुमारः कुपितो धनुष्मान् विसूतकेत्वश्वधनुश्शताङ्गम् ।
चकार तं श्येनमुखं स रात्रिंचरः कृपाणीवसुधां प्रपेदे ।। ।।72।।

स च निशिचरमुख्यश्चर्मणाबाणजालं
करधृतकरवालो वञ्चयन् तद्धनुश्च ।
निजरणनिपुणत्वं दर्शयन् व्यच्छिन-
त्तत्करणतुषितरक्षस्सिंहसंघो ननाद ।। ।।73।।

तदनु दनुजसेनानायताय स्वकीयां
त्रिपुरहरकुमारो मोचयामासशक्तिम् ।
स च दिविभववेश्या संहतेश्चापि नीवी-
स्सुरभिकुसुमवृष्टिं सा च तस्मिन् कुमारे।। ।।74।।

अग्रजाप्तसुरीभोगलब्धिलुब्ध इव स्फुटम् ।
तत्समीपमवापाशुवीरशर्मारिणा हतः।। ।।75।।

In Public domain. Digitization Muthulakshmi Research Academy

शम्बलः प्रमथनाथशरार्तः कम्बुकर्णसहकृत्करिराजम् ।
अभ्यधावदधिरुह्य गिरीशं बिभ्यदात्मजनहृत्कुमुदेन्दुः।। ।।76।।

सवारणः पञ्चमुखेन साकमवारणस्संयुयुधे स्वयं यः।
सदा नवारिक्रमिकस्समीकेष्वदानवारिक्रममभ्युपैति ।।77।।

मृत्युञ्जयोऽद्भुतसमीककृतेस्वनाम
सम्यग्विभज्य रिपवे बहुमानपूर्वम् ।
दद्यामिति प्रथमभागमदिद्वितीयो
भागस्तदन्वमरसंघकृते बभूव ।। ।।78।।

तदनु संवर्तमार्ताण्डप्रचण्डदर्शनः फणिराजवलयितकुलाचल-परिभ्रमणक्षुभ्यद्बडबानलज्वालाकलुषितमहोदधिप्रभूतोत्कटचटचटायमान-स्फुटितगिरितटाभीलहालाहलसम्भ्रमः प्रलयाकालैकार्णवीकरणदुरन्धरोद्ग-र्जत्पुष्कल शुष्काशनिपातदारुणधाराधरविलासः पलाशकुलभय तिमिर-तरणिरुल्कामुखः कर्कशःकर्कोटकदंष्ट्रायितशिखिशिखासखशिलीमुखैर-खिल प्रतीकिनीं क्षतवितताम करोत् ।।

उल्कामुखेषु क्षुभितो मरुत्वानुल्कार्दितस्सिन्धुरराडिवार्तः।
शताङ्गमुत्कृत्य शरैःखनृत्यच्छताङ्गनानां कलिमाततान ।। ।।79।।

हरिहयधनुषश्शरस्सुरद्विड्वरवपुषो युधि चेतनैककालम् ।
निरगमत दिवस्सरोजवृष्टिर्जलमपि शत्रुवधूविलोचनेभ्यः।। ।।80।।

इति श्रीमद्याज्ञ्यवल्क्यशाखाफलायित
काश्यपगोत्रकेशवार्यपुत्रश्रीजगन्नाथकविकृते
जगन्नाथचम्पूप्रमबन्धे तृतीयोऽयं स्तबकः।

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थस्तबकः

अथ यातुधानसार्वभौमेन निर्वक्रविक्रमधौरेयान् देतेयानादितेय-प्रतापहुताशशलभानालोक्य चक्षुषो धनुषश्च शरासारान् मुञ्चता नवकोटि-धनुष्मत्सहायवता विहायानीकमन्तर्दधतामायाविना मायाभावरुष्टाविसृष्टा-कष्टतरनिष्ठुरभिण्डिवालकरवालामोघदृघाणादिप्रहरणवर्षं वर्षन्ती सहस्रबाहूरु शिरोधरा प्रादुरास ।

कुत्रचिदसंख्येयधराधरान् कुत्रचिदपरिमेयधरारुहः कुत्रचित्प्रभूत-निर्घातान् सृजन्तः कर्बुरदिगम्बराश्च च्छिन्दन्तो भिन्दन्तो वीरालापमुखरित-हरिन्मुखास्समभिदुद्रुवुः ।

तदा देवसैनिका निकाममार्ताः कीर्तिकामा यावज्जीवं नियुध्य श्रान्ताः एकादश अपि रुद्राः अनेकादशाजग्मुर्द्वादशतरणयोऽपि विपद्वादशतरणिनो बभूवुरष्टादिगिशा नष्टादुद्रुवुरेवं कान्दिशीका बृन्दारकाः वन्दारुमन्दार सुन्दरं सुन्दरपुरीशमिन्दिरारमणं शरणं प्रापुः।

विलोक्य जगदीश्वरो विकलितांसुरानीकिनी–
मकातरनिशाचरप्रबलमायया तर्जिताम् ।
जितारिनिकरोन्मिषद्विषरुषा कषाये क्षणः
क्षणेन शरजालकालितरिपुं वितेने रणम् ॥ ॥1॥

जगत्पतिप्रोझ्झितदिव्यबाणकृशानुदग्धारिनिकायमायः।
सुपर्वसङ्घोऽपि सपर्वतारिरवाप्तसर्वश्चकमे तदानीम् ॥ ॥2॥

कम्बुकर्णोऽपिजगन्नायकसायकमायितमायो नयनगोचरस्सानुचरस्सु-मेरुसानुचरो वनचरराजवन्नदन् वनचरराजराजदेवराजादीन् जाङ्गलोद्गारिमुखै

In Public domain. Digitization Muthulakshmi Research Academy

शिलीमुखैर्व्यथयन् हरिहराभ्यां निजशराभ्यां तारिताशाभ्यामभ्युद्गमदग्नि-कणस्फुरद्व्यक्तिंनक्तं चराभिपद्यमानानुरक्तिं शक्तिमुक्तवान् ॥

कल्पान्तनिर्घातनिपातकल्पं शक्तिद्वयं तद्युधि चक्रपाणिः।
चकार कोपोज्ज्वलदृग्वितानैर्गङ्गाधरस्य प्रियमङ्गरागम् ॥ ॥3॥

तदनु दैतेयधनुर्धराःदनुजधराधरप्रेरणरणकुतुकाःजितकाशिनः शतशः शरपरशुमुखविशिखान् सृजतो न्यपतन् ।

तदा दानवारिरैपवमपारमभिक्षणद्विगुणायमानरणसन्नाहं समवेक्ष्या-म्बुजाक्षो रक्षःक्षपणाय कौक्षेयपाणिः पक्षीशमत्वरयत् ॥

तत्रान्तरे कृत्तिवासाः लयकालदावानलसदृशबहुविधप्रहरणजनकम् पाशुपतास्त्रं प्राहिणोत् ॥

आशरधनुर्धराश्चानुपतत्पाशुपतास्त्रवित्रासिताश्छिन्ना भिन्ना भग्ना-भुग्नाश्शकला विकला हुतभुजि पतङ्गा इव दग्धमुग्धाःक्षणादेव क्षयं जग्मुः।

शर्वास्त्रवह्नेस्सकलं दिदृक्षोर्निर्वापणायेव निवृत्तबन्धोः।
रक्षःपतेस्तस्य रणोत्तमाङ्गे चक्षुर्द्वयी तोयदतामवाप॥ ॥4॥

ततः कृतकृत्यमिव मन्यमानं शतमन्युमालोक्य दैन्यैकनिलयः कम्बुकर्णः रणान्ते कृतान्तमेव शरणमिच्छन् नानामुखशिलीमुखनिरन्तर-हरिदन्तरो हरिमेवाभिजगाम ।

हरिस्ससर्जाहितरक्तपानस्फुरन्मुदाचोद्गिरदग्निकीलम् ।
सुदर्शनं दर्शनमात्रबिभ्यत्पलायितानेक पलाशजातम् ॥ ॥5॥

निकृत्तमूर्धा निपपात राजा सुदर्शनेनार्यसुकर्षनेन ।
विरेजितुस्तस्य शिरः कबन्धौरसाप्रसुप्ताविव राहुकेतू ॥ ॥6॥

In Public domain. Digitization Muthulakshmi Research Academy

हतावशिष्टाः क्रतुभुक् द्विषःप्रोज्झितायुधा जग्मुरतीव दीनाः।
नितान्तरोषाद्युधि निर्जरास्तान् कृतान्तलोकं कुशलाःप्रणिन्युः।। ।।7।।

अथासुरीणाममराङ्गनानां शान्तप्रभूनां सजयप्रभूनाम् ।
न कण्ठनादा दपितु प्रलापाद्विषादसन्तोषविभक्तिरासीत् ।। ।।8।।

ततस्सुत्रामा कार्तिकेयनिर्वर्तित सेनानिर्वर्तनः पुरस्कृत्य मुरारातिनिधनजनित हर्षाङ्कुरितकञ्चुकितः पटुतरमहानटप्रमथगणार्भटी स्फुटितदिक्करटिघटाकर्णपुटं निटलतटघटिताञ्जलिपुटवीर भटक्ष्वेलाविलारि-पुटभेदनं दुर्वारमनोरथनिर्वहणसकुतुकगीर्वाणं कुलटाप्सरोलास्यानुकूल तादृक्त्रिदशमुनिगान पल्लवितद्रवितस्थाणुपाषाणं मणिकोणरणित निस्साण-पणवाद्यनेकवाद्यहृद्याभ्युदयं समरावतीर्णदुर्जयममरावतीपट्टणमासेदिवान् ।।

महोत्सवश्रीमहतातिसान्द्र परिष्क्रियाभिः पथिकामिनीभिः।
विकीर्यमाणः कुसुमैस्सलाजैश्चकार शक्रस्सदनप्रवेशम् ।। ।।9।।

सल्लापसौख्यमनुभूयसभातले स्वः
कल्लोलिनीसुरभिमारुतशीतपोते ।
जातानुरागमतिभक्तिनतोत्तमाङ्गैः
प्रीतिं ययौ मुररिपुश्शतमुन्युमुख्यैः।। ।।10।।

प्रथममनिमिषत्वप्रापणादाशराणा-
मधिगतकुतुकानामानतेः पात्रमासीत् ।
तदनु दनुजवीरध्वंसनान्मांसलानां
सकलमुनिगणानां सन्नुतेश्शार्ङ्गपाणिः।। ।।11।।

In Public domain. Digitization Muthulakshmi Research Academy

अथैवं किञ्चित्कालमपनीय क्षपाचरनृपावलेपविपिनकृपीटयोनिः सुभद्राजानिः कृपातरङ्गितान्तरङ्गः शृङ्गारवतीस्मरायासवतीर्युवतीस्मरन् स्मराराातिसहायः प्रस्थातुं वास्तोष्पतिमामन्त्रयत् ।

देवराजोऽपि सावधाननिष्पादितसदुपचारः प्रणयविह्वलो बह्वलङ्कारं चातुर्विध्यं निध्यश्चितपरार्थ्यं पदार्थमणिमादिभूतिसर्वस्वं सर्वसुपर्व-निवहैस्सह समर्प्य कार्पण्यहीनोऽहीनाङ्गदसङ्गतमहीनशयनं नयनजलैर्मोदजैः पादजलजपरागमार्जनं प्रणमन् स्वयमनुगम्यमानः चतुरङ्गिणीं चतुराङ्गना सङ्गतामनुगमनायाज्ञापयामास ।

तदनु मृदुलनर्मालापविद्योतमानप्रणयजनितनानाहावभावानुभावैः।
अतनुशत सहस्राण्यग्रतः कल्पयन्त्यः यजनभुगमलाङ्ग्यो यातुकामाः प्रपेदुः।

ततस्ते सर्वे सर्वेश्वरानुयायिनः समधिगतधनेशसम्पदरुंतुद-निरन्तरवैभववितत चतुरन्तयानाभिर्मन्दयानाभिरनुगतास्समारूढनिजवाहाः जवाहतशब्दितातोद्यमनोहरं हरन्तो मनांसि मानवतां वदन्तो वचांसि मोदवतां यातायातं वितन्वन्तः स्वैरं चरन्तः कन्तुसन्ताना इव जगन्मोहनविहाराः जगदीशकृपातिथयोह्यवितथशीलाः कृतवियन्नदीसन्तारास्तारापथाद्धरापथं प्रविशन्त स्तत्रत्यवैचित्र्यं प्रदर्शनायुधस्य मनः प्रीणयन्त्यः सत्वरलास्य-तत्पराप्सरः कान्तानुभावचातुर्येषूल्लोचनगोचरितकुचैकदेशनिमेषमात्रस्फुरण-जाय मानमनोजातदशास्त्रिदशाः धृतरूपाः शृङ्गाररसा इव रसाभिधानवधू-मुक्ता लन्तिकामिव प्रवलन्तीं स्मरणमात्रविध्वस्तभवसङ्गां गङ्गामद्राक्षन् ॥

तत्रान्तरे भर्तृसमागमस्य विवक्षयेवाब्जविलोचनाभ्यः।
विश्वाधिभर्तुर्विरहातुराभ्यः चैत्रोऽभ्यगाच्चित्रकिसालसालः॥ ॥12॥

In Public domain. Digitization Muthulakshmi Research Academy

मूकत्वं कोकिलानामपहृतमभवन्मुग्धपर्णाभिपूर्णाः
शाखा पृथ्वीरुहाणां शशिकरविमलास्तीव्रयामास्त्रियामाः।
चैत्रे श्रीमत्युदारे विजयति मधुलिट्खेचरीगानशीलाः
दूरस्थाः पान्थधीरास्वकलितकुचावीक्षणोद्यत्प्रतीक्षाः ।। ।।13।।

मासेस्मिन्माधवीनां सुममधुलहरी पानमत्तालि मौर्वी–
निर्घोषभ्रान्तपान्थे विचरति मृगयां निर्भयं वीरजेषौ।
धन्याः पाटीरगुप्तस्तनकुधरमहादुर्गसंस्थावधूनां
कुर्वन्त्या ताम्रबिम्बाधर मधुरसुधापारणामप्रमत्ताः।। ।।14।।

वारं वारं निकुञ्जे शशिकिरणलसत्सैकते लोकरम्ये
किञ्चिद्‍थारान्तरप्रोच्चलित कुचयुगं मन्दमन्दस्मितान्तम् ।
मासेऽस्मिन् भीतिसौक्ष्म्यप्रकटनचणदृक्पातसौरभ्यजुष्टं
कं वा भाग्याभिनीतं रमयति वनिता कन्तुकेली विदग्धा ।। ।।15।।

चैत्रमासि विकसत्सहकारप्राज्यपुष्परजसा परिवीते ।
योगिनोऽपिवनितास्य दिदृक्षाजीवतोऽनलभतेस्थ विरत्वम् ।। ।।16।।

एवं कुसुमसमये विजृम्भति ।

हा प्राणनाथवरद व्यनुतिष्टसे स्मान्
कस्माज्जहासि करुणाकर दीनबन्धो ।
एवं विलप्य करुणं मरणोन्मुखीभि–
स्ताभिश्शुभानि शकुनानि शनैरलाभि।। ।।17।।

श्रीमज्जगन्नायकचिन्तनानुषक्तस्य तस्योभयथा तदानीम्
वामत्वमाप्तं वनिताजनस्य भ्रूनेत्रबाहूरुकुचञ्चचाल ।। ।।18।।

In Public domain. Digitization Muthulakshmi Research Academy

तत्काले पतगेन्द्रपत्रजनितो नृत्यत्सुधाशार्ङ्गना–
धम्मिल्लाञ्चितचञ्चरीकनिवहप्रालम्बिमालातते:।
सौगन्ध्योद्वहनादिवालसतमश्शैतल्यवातार्भकः
सञ्जातं सुरभीचकार सुमनस्रोतस्विनी भुरुहाम् ।। ||19||

वीणानिक्कणनोपबृंहितदिवौको गायकस्त्रीध्वनि–
र्नानाराक्षसनाथमर्दनकथासल्लापवीरध्वनिः।
श्रीनाथस्त्रिदशाधिनायकभयोत्सादाहवप्राभव
स्वामिन् रम्यपुराधिनाथ! जयतामित्यादिवन्दिध्वनिः।। ||20||

सन्तुष्यद्भटसिंहनादमिलितश्रीपाञ्चजन्यध्वनिः
सौवर्णोन्नतकोणताडितमहाभेरीमृदङ्गध्वनिः।
तासां श्रीजगदीशचिन्तनकलासक्तात्मनां योषिता–
मानन्दं जनयांम्बभूव हृदये कर्णाध्वनान्तर्गतः।। ||2||

तत्राजगाम दयिताजनता दिदृक्षा
चञ्चूर्यमाणहृदयस्सदयस्वभूस्सः।
शच्यङ्गपत्ररचनाचणजिष्णुहस्त
विन्यस्तचामरमरुद्ग्लपितश्रमाम्बुः।। ||22||

श्रियःपतिक्षणमपिकरोद्विलम्बं
नितम्बनीवदनविलोकनत्वराढ्यः।
तदाभवत्कृशवपुषान्तदेवतानां
शतायुतायुतनियुतः परार्थकालः।। ||23||

दृष्ट्वान्तःपुरमागतं प्रतिभटप्रध्वंसनश्रीयुतं
श्रीनाथं शरणागतार्तिशमनं जीमूतपोतोज्ज्वलम् ।

In Public domain. Digitization Muthulakshmi Research Academy

कामिन्योऽनुबभूवुरस्तविरहाघर्मातपग्लानिमद्
वीरुद्भिभ्रममिन्द्रिदिग्भवमरुत्प्राक्सूचिताभ्रागमे ॥ ॥24॥

एकातिमोहविवशा प्रियमम्बुजाक्ष-
मालिङ्ग्यकण्टकितपीनकुचाग्रघातं ।
निष्पीड्य तीव्रमधरं मधुरं मृगाक्षी
कोपं जहौ विरहतापरुजा सहैव ॥ ॥25॥

अन्याप्युवाच युगपज्जनितानुराग
कोपाभवत्खलु तरां नदतां क्षतिस्तु।
सापत्न्यसङ्गमविधौ नखरक्षतानि
सत्सङ्गतस्सखिजनाः कृतसात्त्विकास्ते ॥ ॥26॥

अन्याभिगम्यरमणस्य कपोलनेत्रे
कृत्वानुरागबहुलानि च चुम्बनानि।
पीत्वाधरामृतमनूनमलञ्चकार
साकूतदृग्भिरधिवक्त्रसरोजलक्ष्मीः॥ ॥27॥

हे नाथ! वेद्मि हृदयं जहतस्तवास्मान्
जिष्णोस्सहायकरणाय कुतोऽनुरागः।
एकत्र रम्यवपुषामिति सल्लपन्त्याः
कस्याश्चिदक्षिधुरिवदृमवीरुधो सन् ॥ ॥28॥

श्रीकान्त ते चरणपङ्कजसेवनाप्तिः
ह्यःकालमेवभवितेति कृतोद्यमायाः।
मुक्तास्रजस्तनतटीनिहिताः कृतार्था-
स्सन्त्वित्यभीक्ष्णमपराप्रियमालिलिङ्गे॥ ॥29॥

In Public domain. Digitization Muthulakshmi Research Academy

जीवेश्वराननसरोजनिमग्नभावा
भावोदयप्रदरसम्भृतपारवश्या।
नीवीं स्वयं विदलितामपियोषिदेका
नो वेद पल्लवयतीव रतिं वधूनाम् ।। ।।30।।

श्रीमज्जगन्नायकसार्वभौम कटाक्षपीयूषरसाभिषिक्तम् ।
मध्यं विना कार्श्यमपास्य तासां प्रतीकबृन्दं परिपूर्णमासीत् ।। ।।31।।

प्राणेश्वरे दूरपथं प्रयाते तालीदलाभास्तरुणीकपोलाः।
पुनस्तदोष्ठामृतपूर्णयोगाल्लावण्यरम्यालवलीदलाभाः।। ।।32।।

प्रसन्नवदनाजगत्प्रभुकटाक्षसम्मानिता-
न्तमनुरागपङ्किलितमानसा योषितः।
प्रमोदसलिलाकरे प्रबलसंपदामाकरे
वितेनुरनिवारितोत्प्लुतनिमज्जनोन्मज्जनम् ।। ।।33।।

गायन्त्यःकामगाथाः कुवलयनयनाः कान्तवक्षःकवाटं
स्वर्णोच्चैःक्कन्दुकश्रीमहितकुचयुगैरुल्लिखन्त्यस्सहेलम् ।
पश्यन्त्यःकन्तुकेल्यायितमवयवसन्दोहमाधानयन्त्यः-
स्वच्चन्दं ताविजह्रुस्समधिगतमहाकौतुकावेशवत्यः।। ।।34।।

एवं ताभिश्चञ्चरीकालकाभिर्भावग्राही पङ्कजातायताक्षः।
यावन्मोहं कान्तवं काममाप्त्वा मध्ये गङ्गां माधवो गाहते स्म।।35।।

श्रीमानमेयविभवो भगवान् जगत्पतिः सुभद्रापतिः देवनद्यां हृद्याङ्गनामध्यं गतया कृताभिषेकया सह कृताभिषेको धृतालङ्कारश्च-मानुषप्रत्यायितप्रात्यब्धिकमैथुनिकोत्सवानुबुभूषया पूषण मपिभूषण-त्विषा

In Public domain. Digitization Muthulakshmi Research Academy

वेषयन्तं पुष्परथमारुह्य बाह्योद्यानाभिमुखो बर्हिर्मुखानिमिष्य–भौष्यदायी प्रयायी बभूव ।।

शनैश्शनैश्शंखरथाङ्गपाणि स्फुटातसीसूनुसुदर्शमूर्तिः।
ययौ वतंसार्थितकाययौव्वतप्रभापरीतस्सतटिद्रुफुनाभः।। ।।36।।

सविवेशातसीपोतस्फीतकुञ्जगृहान्तराम् ।
पाञ्चशर्याश्वसर्वस्वमन्दुरां सुन्दराटवीम् ।। ।।37।।

तां पश्यन् सपथि निरन्तरद्रुमालां
मालाकृत्सु घटितभूरुहालवालाम् ।
वालश्रीरुचिरतरोत्प्लवैणबालां
बालाभिस्सह निरगात्तमालनीलाम् ।। ।।38।।

पश्यन् पश्यन् पथि निरवधिप्रौढपुष्पन्धयस्त्री
गानानूनान् वरसरलपुन्नागपूगद्रुपूगान् ।
श्रुण्वन् श्रुण्वन् किसलयसत्पुष्पितां वप्रशाखा
मध्यस्वैरं चरपरभृदालापमापात्मगेहम् ।। ।।39।।

तत्र योगिसभामध्यासीनं चतुरास्याद्यावश्यकजनोपास्यमानं विश्वातिशायिमहिमानं हिमानन्त्यभूधरराजमिव साकारं शोकापहारचातुरी धुरीणवारुणीसेवनोपलक्षकचक्षुर्विलासं पलाशनपलायनायाहमहमिक – योद्युक्तारक्तमुखहलमुसलधरं निरवद्यपद्यगद्यात्मिकतया महतीसहायवता कलहभुग्योवताप्रत्युपगीय मानवनविहृतिप्रभृतीन्द्ररक्षणोद्गमनपुनरागमना–वबृथिककथाप्रपञ्चश्रवणजातकुतूहलेन मनसाकैदाकद्यबुध्यात्मीयदर्शनाय प्रतीक्षमाणमग्रजन्मानमभिराममगुणाभिरामं बलरामं निरीक्षितवान्मुरारिः।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमद्बलभद्रदर्शनमभद्रशमनायेति व्याहरन् सुभद्रानाथः पदातिरेव-सानुगस्सभार्याश्चार्यपादावलङ्कृत्य स्वलङ्कृतेन मूर्ध्ना निषण्णो विषण्ण-जनताभयवदान्यो मान्यजनैः कृतसल्लापस्सामाजिकान् सर्वानामन्त्र्यैक-तस्तालाङ्केन सह सल्लापानन्दमनुभूयानुपूर्व्यं दार्वञ्चितप्रतिमायां नाव-मिकावतारं विधायामन्तर्दधे।

सुभद्राऽपिभद्रायितव्यक्तिभिश्शक्तिभिस्सहतथा विधात्मप्रतिरूपे तथा बभूव।

बलभद्रोऽपि जगद्भद्र दिदृक्षुर्निजप्रतिबिम्बमाललम्ब।।

मरुत्वानपि कृत्वानतीः स्तुत्वातीवाग्रजसनाथं सुभद्राप्राणनाथं श्रीजगन्नाथं तदीयं निन्द्ये तरकल्याणगुणगणकीर्तनापहृतदुर्दशैस्त्रिदशैस्सह त्रिविष्टपमध्यतिष्ठत् ।

पुरहरोऽपि मुरहराज्ञयानुगच्छच्चक्रराजसहायः श्रीनाथमेवात्मनाथं स्मरन् सानुगो निवेशनमाविवेश।

हेतिराजोऽपि भूतराजकृतपूजास्फीतो जगदीशपाददर्शनमाततान ।

ततो भगवदाज्ञापरतन्त्रदर्शनं सुदर्शनमध्यर्चास्तं भमन्वलिय्यत च तदा नारदादि योगिनो वागीशादिपुरस्सराः भोगिशयनं नयननिर्जिततामरसं रसाभारापहरणपटुसायकं श्रीजगन्नायकमग्रजहेतिराजसहितं सदारमुदारगुण-मपूयजन् ।।

चतुर्मुखोऽपिस्वमुखोऽपि स्वमुखसम्भूत पुरातनवाग्भिस्सनातनपूरुषं साकारयन् लोकगुरुर्गुरुतरमणिगणस्यूतमौलिदीधित्यात्यन्तविमलनखचन्द्र कलाश्शबलयन्नत्वा स्तुत्वा च दार्वर्चान्तः परिपूर्णसारस्य सारस्य पूरिकासारस्य चारुपुरीनाथस्य श्रीजगन्नाथस्य दृष्टपूर्वकथाभिवर्णन-

In Public domain. Digitization Muthulakshmi Research Academy

कलकलेन दशदिशो घोषयद्भिर्योगभूषणैर्मुनिभिस्सहस्वर्गङ्गामुन्नपत्य सत्यलोकमुपागमत् ।

श्रीमद्रम्यपुरी मनोज्ञलहरी गोदावरी माधुरी
सारग्राहिवचः प्रचारणमनोहृत्सुन्दरीभूषणाः।
वीणापाणिनि वाक्काणादगुणिवाक्काव्यादिवाक्साधना
धीनानूनधियः श्रियःपतिभृताः श्रीवैष्णवा भूर्षवः।। ।।40।।

दृष्ट्वाजगद्भावुकचैत्रपद्मजाकटाक्षसंपद्धरितं हरिद्गणम् ।
प्रपञ्चभर्तुः प्रतिवत्सरोत्सवं समारभन्ते शुचिसप्तमी दिने ।। ।।41।।

यथा रङ्गनगरे तिरुवरङ्गत्तमुदनार्यः श्रीरङ्गनाथकृपैकपात्रं तथा साधुनिगमे जगन्नाथकटाक्षनिर्वाहितसर्वाध्यक्षभूमातिरुवरङ्गकुलधामा रङ्ग-नामा सुगुण सीमापरभाग भागवतशिखामणिः विमानगोपुरप्रासाद-प्रसादनाय प्रसादैकभाजनान् जानानादिदेश ।

दुग्धकर्दमितमौक्तिकभस्मस्निग्धलेपनलसत्प्रतिबिम्बाः।
भित्तयस्दनुलोकदिदृक्षाक्षुद्व्रधूविहृतिमुल्बणयन्ति ।। ।।42।।

प्रोलम्बन्निजघृणिचित्रितान्तरालानेकोच्चैर्मणिमयदीपपात्ररम्यैः।
मुक्तास्रक्सहचरपुष्पमालिकान्तैरामोदञ्जनयति मण्टपं वितानैः ।।43।।

स्वर्णदीप्रविततताम्बुजरागामोदकल्पितकुतूहललेखम् ।
तारकापथभिदूर्जितचक्रं गोपुरं भजति गोपुरसाम्यम् ।। ।।44।।

रत्नप्रभारञ्जितचित्ररूपमपारनैपथ्यविधाविशेषम् ।
द्रष्टुं गतानामथ दृङ्निमेषस्तम्भं ध्वजस्तं भमभूज्जनानाम् ।। ।।45।।

In Public domain. Digitization Muthulakshmi Research Academy

माङ्गल्यतोरणवितानमणिप्रभाभि-
र्भूमिःकृत प्रचुररङ्गलता विचित्रा ।
सौवर्णकुट्टिमरुचा रुरुचे विहायः
किम्मीरपट्टवसनं दधदुत्सवादौ।। ।।46।।

तथा विभाति भाति रोहितार्कगोपुरं पुरं
पुरे पुरं दराश्मरश्मिविस्फुरच्चतुष्पथम्।
चतुष्पथे चतुष्पथे सुधाविदावहागृहा
गृहे गृहे समुच्छ्रिताश्चिरत्नरत्नकेतवः।। ।।47।।

निजाज्ञाशेखरैश्शिल्पिकुलशेखरैरलङ्कृतदिगुपान्तमनन्तविश्वकर्मणाम -प्यनिर्णेयकरचना विशेषमशेषगोपुररमणीयमपि शेषगोपुररमणीय-मष्टैश्वर्यभवनमप्यनष्टैश्वर्यभवनं वनीशमणिभूषितमप्यवनीशमणि-भूषितं सुमेरुमिव कल्याणवाग्व्यवहारं परं पदमिव स्फुरन्मौक्तिकवितानं सार्वजन चित्रितमप्यसर्वजनचित्रितं देवनरोचनवैभवञ्च देवनरोचितवैभवं भवाप्त-सदनमिव नीलशंखास्पदतलं तलोदरीवदनमिव चन्द्रमण्डलशोभं सन्मण्डलमिव न भोगतारतम्यं देवहर्म्यं लोचना शेचनकं निरीक्ष्य सपरभाग भागवतशिखामणिश्रेणीजनानामेणीदृग्गणागणितमण्यग्रहाराग्रहारादिकमाभि-मत्यं बाहुमत्यं समर्प्य तौर्यत्रिकामूर्छल्लोकत्रिकं सकलप्रकृतिनिवहैस्सह भगवतः श्रीजगन्नाथदेवस्य वैवाहिकमहोत्सवमुद्दिश्य सद्वेश्यवर्तनहितैः पुरोहितैः पुण्याहमवाचयत् ।।

सदृक्प्रियासम्भवहेतुनेष्टं
विचिन्वतीनां विभवाधिकानां ।
पुण्याहघोषःपुरुहूतलोक -
पण्याङ्गनानां फलसूचकोऽभूत् ।। ।।48।।

In Public domain. Digitization Muthulakshmi Research Academy

तदा पाञ्चरात्रक्रमे सक्रमं प्रवर्तमाने सकलनरपतिसुकलाःकलापिन इव कलापभृतश्शशभृत इव कृतलक्षणाश्चित्रवेषास्तत्र भवतो जगदीशितु - र्वैवाहिकमहोत्सवदिदृक्षया निजदेशानुसारिविभवसमग्राःसमागच्छन् सर्वे दे-वास्समधिगतसकलसन्नाहास्सयोषितश्चावतरन् ततस्तै वैष्णवास्सक्रम-मुपक्रमितगारुडाह्वानकृत्यास्ताक्ष्र्यं पटगतमावाह्या सह्य विषधरधरंधराकम्पन जंघालपक्षवातूलमालोकमात्रविगलित विषधरत्वभुजङ्गराजमुत्तमतौर्यत्रिकेन चातुर्जातपुरस्सरं हरिमन्दिरमुपवेश्य भगवत्सन्निधौ नवीनेनापि सवीनेन तेन पटेन ध्वजराजमराजयाञ्चक्रुः।

तदनु सद्गुणानीतमुद्गिरदाज्यं मुद्गोदनं भगवते निवेद्य तदाज्ञयानगौ-कस्पतये निवेदयाञ्चक्रुः।

वन्ध्या युवत्योऽर्चकवाक्यतुष्टाः स्पष्टं भवत्यात्मजसौख्यलाभः।
मुद्गान्नमित्युद्गमितं गृहीतं कुर्वन्ति यत्नं कुतले मिथस्तत् ।। ॥49॥

ततो भगवतो जगन्नाथदेवस्य सन्निधाने तीर्थप्रसादस्वीकारमारचय्य सर्वे निर्विशेषं शेषशयनमानम्य पुनरागमनायानुज्ञाता यथागतं जग्मुः।

ततो हरिपरिचरास्तदानन्तर्यक्रियाकलापं निव्यूह्य भवनानि विविशुः।

अथो नवम्यामभिजिन्मुहूर्ते विवाहकार्यं विबुधा वितेनुः।
जगत्पतेस्तस्य जगज्जनन्याः पुरोहितास्सज्जनता पुरोगाः।। ॥50॥

भेरीमृदङ्गपणवानकगोमुखादि
वादित्रघोषमभितः ककुभो निशम्य।
श्रीमज्जगत्पतिविवाहनिरीक्षणाय
यास्यामहे वयमितिप्रतिघोषमीयुः।। ॥51॥

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गीतसंपल्लवितात्मवीणासौरभ्यलुब्धभ्रमरीसहायाः।
भूयोऽविदन्तुम्बुरुनारदाद्या भूयात्सदा मङ्गलमित्यगायन् ।। ।।52।।

पुष्टोर्ध्वभागविचलत्कचभारबद्ध मालागलन्मदनबाणनिरीक्षणेन ।
उद्धीपनं रतिपतेर्जनयाम्बभूवुर्वेश्यावधूवरपुरो विविधं नटन्त्यः।।53।।

जयजयजगत्सार्वभौम सकलजन्तुसन्तानज्ञानदानप्रवीणपरिज्ञान-शक्तियुक्ताभिमुख्यषड्गुणैकतानचेतनवितानकृतापराधगणं गुणतया श्रुत्य-विश्रुतनित्यनिरवधिककरुणाकरताधुरीणकार्यकारणस्वरूपसकलवेदान्तगेगीयमानगुणरत्नाकररत्नाकरसुताधिनाथश्रीजगन्नाथपरब्रह्मप्रभो!परमविज्ञानिनो योगिनो भासुरचराचरप्रपञ्चं भवन्मयमिति जानन्त्यानन्त्यस्वप्रकाश प्रकाशित ब्रह्माण्डप्रकृतिबन्धो! दयासिन्धो! सिन्धुसुतया सहसुन्दरपुरीमन्दिरे वारं वारमनुवत्सरं महोत्सवाननुभविष्णो विष्णो ! पाहि पाहीति ब्रह्मवादिनो जगुः।।

सुन्दरपुरीशशरदिन्दुरुचिराननपुरन्दरशिवादिसुरवन्दितपदाब्जानन्दमय कुन्दरदचन्दनविलिप्तघनसुन्दरशरीर! मुचुकुन्दवरदायिन् । दुन्दुभिसमस्वर सनन्दसनकादिमुनिवन्दित परत्वगुणतुन्दिलयशोदानन्दन! सरोजवनमन्दिर! वसुप्रदकुकुन्दरवतीश जयतां दलितशत्रो!।

श्रीमदवाप्तसमस्तमनोरथसिन्धुरराड्वरदो! जयतां कामितफलसंघटक निशाचर गर्वविनाशकरो! जयताम्। तामरसाक्षविधातृपितश्शिवताति महाविभवो जयतां श्रीमधुराधरसीधुवशीकृतचित्तविभो! जयतां जयताम् ।।

इति स्तुवन्तिवन्दिनः पतत्रिगं परश्शतं
नतिं नयन्ति निर्जरा नरा नवानुरागिणः।

In Public domain. Digitization Muthulakshmi Research Academy

स्मितातसीप्रसूनसंस्थितप्रमत्तपुष्पलिड्विव–
तिप्रभाविभासि साधुभासमग्रविग्रहम् ।। ।।54।।

एवं विवाहस्य विवाहोत्सवे विजृम्भिते महाभागवतशिखामणिः भगवन्निवेदनार्थं भोज्यसर्वस्यानयनाय व्यजिज्ञिपत् ।।

सवलयमधुद्राक्षाखर्जूरपानसदाडिम
प्रवरकदलीजम्बूजञ्जीरचूतफलोत्करान् ।
मृदुलविदलस्निग्धं मृष्टोदनं च चतुर्विधं
विविधमधुरापूपा नानिन्युरार्यवरा मुहुः।। ।।55।।

अर्चकास्तद्पदार्थनिकरं कृतोद्वाहमङ्गलवते भगवते निवेदयाञ्चक्रुः।

निवेद्यमाने निखिले पदार्थे बलिं सुरेभ्यः प्रददुर्विधिज्ञाः ।
ततो जनास्तत्र गताः कृतार्था हरिप्रसादेन हतांह्वसोऽसन् ।। ।।56।।

न तत्र कश्चित्प्रभुभूषितो जनो
न तत्र कश्चित्प्रपिसयार्थितः।
न तत्र ताढ्ये जगदीश्वरोत्सवेन
न तत्र कश्चित्क्षुभितोऽलसो वा ।। ।।57।।

श्रीमज्जगन्नाथ रमाविवाहपुण्योत्सवोत्सर्जितपुष्पवृष्टिः।
खसञ्चरत्कज्जलदृग्वरीणामानन्दबाष्पैरभवत्सभृङ्गा।।।।58।।

सकलदिविजसंघाःस्वामिनस्तद्विवाहो–
त्सवमधिगतमोदास्सावधानं निरीक्ष्य ।

In Public domain. Digitization Muthulakshmi Research Academy

ययुरनुगतदारास्तीर्थयात्रान्तमुद्य-
त्पुलकतनुलताभिः पुंश्चलीभिःपरीताः।। ।।59।।

रहस्यकेलीपररम्भणाङ्कितस्फुटेन्दिराचूचुकमुद्रितं हरेः।
उरस्थलं नेत्रचरं स्मरन्त्यो ययुर्युवत्यस्सखिभिस्समग्राः।। ।।60।।

चातुर्जातं स्वस्वदेशान्ययौ स्वै स्वैर्यथागतम् ।
रमानाथकृपालभ्य रमावासनिकेतनम् ।। ।।61।।

एवं जगत्पतिरशेषजनस्य मोदं
सम्पादयन् स्ववशवर्तितदिव्यचेष्टः।
क्रीडत्यनन्तसमयं बलभद्रभद्रा
चक्राधिराजसहितः खलु सौधपुर्याम् ।। ।।62।।

श्रीमज्जगन्नायकमङ्गलन्ते सिन्ध्वात्मजालिङ्गितमङ्गलन्ते ।
स्वामिन्! ससीरायुध!मङ्गलन्ते चक्राधिराट्छेवित!मङ्गलन्ते ।। ।।63।।

इति निगदितमीश्वरस्य विष्णोश्चरितमनन्तविचित्रकर्मणोऽस्य ।
श्रवनपुटरसायनं कृतीनां शृणुत जना न विरोधमाचरध्वम् ।। ।।64।।

असौ जगन्नायकरत्नभास्वत्सुवृत्तमुक्तासरसप्रकाशः।
चम्पूप्रबन्धो भुवि सज्जनानामाभास्करं भूषणातामुपैति।। ।।65।।

शास्त्राण्यधीतिविषयानि न काव्यजातं
जात्यन्धदृग्विलसितप्रतिमं कुतोऽन्ये।
बीजञ्च नोङ्कुरमुपैति कथं कवित्वं
वृत्तज्ञता शशविषाणनिरूढिकल्पा।। ।।66।।

In Public domain. Digitization Muthulakshmi Research Academy

तथापिमत्तः कविता प्रवृत्ता मरुत्स्रवन्तीव मरोर्विना किम् ।
निमित्तमब्जाक्षकृपैकपात्रास्मद्देशिकान्तः करुणानुभावात् ।। ।।67।।

जगन्नाथपदास्वाद्य जगन्नाथपदार्पिता ।
जगन्नाथकृता चम्पू जगन्मोदयतां सदा ।। ।।68।।

इति श्रीयाज्ञ्यल्क्यशाखाफलायितकाश्यपगोत्र
श्रीमत्केशवार्यपुत्रश्रीजगन्नाथकविना कृते
जगन्नाथचम्पूप्रबन्धे चतुर्थोऽयं स्तबकः।

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकानुक्रमणिका

	स्तबकः	श्लोकः	पृष्ठसंख्या
अखण्डित	1	48	10
अग्रजाप्तसुरी	3	75	40
अग्रे समग्रम्	1	46	9
अङ्गारधानीम्	2	50	22
अथ जगत्पति	3	1	26
अथासुरीणा	4	8	44
अथो नवम्यामभिजिन्मुहूर्ते	4	50	54
अदोषलेश	1	27	7
अधराथन्मुरवैरि	2	1	14
अधुनापि	1	21	6
अन्याप्युवाच	4	26	48
अन्याभिगम्य	4	27	48
अन्यासङ्गापराध	3	13	28
अभ्रङ्गताः	1	44	9
अमरनगरीं	3	12	28
अयं सुतस्तेरिपरं	2	48	21
अररमनो	2	16	16
अर्धोन्मीलित	1	60	12
असौ जगन्नायक	4	65	57
अहो विचित्र	2	43	20
आकर्ण्य चारवचनं	2	38	19
आगच्छति	1	55	11

In Public domain. Digitization Muthulakshmi Research Academy

आगतं	1	2	3
आगत्य तां	2	66	24
आघ्रायामो	1	22	6
आत्मीया	1	10	4
आप्राकृताब्ज	2	70	25-26
आयातं	1	54	11
आयाति	2	46	21
